229.7
ताता।नृ।य

लघु-ग्रन्थमाला

[ ४१ ]

अय्या-श्रीमन्नृसिंहताताचार्यमहादेशिकविरचितो

# यज्ञोपवीततत्त्वविमर्शः

229.2
ताता|नृ|य

सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः

उत्तर प्रदेश संस्कृत अकादमी, लखनऊ

पुस्तकालय

परिग्रहण क्रमाङ्क 7696

वर्गाङ्क 229.2

पुस्तकाङ्क ताता/न्/य

LAGHU-GRANTHAMĀLĀ

[ VOL. 41 ]

# YAJÑOPAVĪTATATTVAVIMARŚA

OF

AYYĀ-ŚRĪMANNṚSIṂHATĀTĀCĀRYAMAHĀDEŚIKA

EDITED BY

DR. N. R. ŚRĪNIVĀSATĀTĀCĀRYA

Reader,

Dharmaśāstra & Mīmāṃsā Department

Benares Hindu University

VARANASI

1986

Research Publication Supervisor :—
**Director, Research Institute,**
Sampurnanand Sanskrit University
Varanasi.

229.7
लाल/ह/14

Published by :—
**Dr. Harish Chandra Mani Tripathi**
Publication Officer,
Sampurnanand Sanskrit University
Varanasi—221002.

Available at—
**Sales Department,**
Sampurnanand Sanskrit University
Varanasi—221002.

First Edition—500 Copies.
Price—Rs. 4.00

Printed by—
Tara Printing Works
Varanasi.

लघु-ग्रन्थमाला

[ ४१ ]

अय्या-श्रीमन्नृसिंहतातार्यमहादेशिकविरचितो

# यज्ञोपवीततत्त्वविमर्शः

सम्पादकः

डॉ० एन्० आर्० श्रीनिवासतातार्यः

उपार्यः (रीडर)

धर्मशास्त्र-मीमांसाविभागे

काशीहिन्दूविश्वविद्यालयस्य

वाराणस्याम्

वाराणस्याम्

२०४३ तमे वैक्रमाब्दे १९०८ तमे शकाब्दे १९८६ तमे ख्रेस्ताब्दे

अनुसन्धानप्रकाशनपर्यवेक्षकः—
**निदेशकः, अनुसन्धान-संस्थानस्य**
सम्पूर्णानन्दसंस्कृतविश्वविद्यालये
वाराणसी ।

प्रकाशकः—
**डॉ० हरिश्चन्द्रमणित्रिपाठी**
प्रकाशनाधिकारी,
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी-२२१००२.

प्राप्तिस्थानम्—
**विक्रय-विभागः,**
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी-२२१००२.

प्रथमं संस्करणम्-५०० प्रतिरूपाणि
मूल्यम्—४-०० रूप्यकाणि

मुद्रकः—
तारा प्रिंटिंग वर्क्स
कमच्छा, वाराणसी ।

श्रीः

श्रीमते श्रीनिवासपरब्रह्मणे नमः

# आमुखम्

लक्ष्मीहयाननो देवस्सत्यां वाचं तनोतु नः ।
यदुपज्ञमिदं सर्वं बाङ्मयं वेदवैदिकम् ॥
श्रीशैलवेङ्कटसुधीन्द्रसुतस्सुधीन्द्रः
श्रीमान्नृसिंहगुरुराह कृतौ यदत्र ।
तस्याय माशय इतीह निवेदयामः
गौणोपवीतविषये तु न मानमस्ति ॥

तथा हि—'यज्ञोपवीत्येवाधीयीत याजयेद्यजेते'ति श्रुत्या सर्वकर्माङ्गतया मुख्ययज्ञोपवीतं विहितम् । तच्च 'उपवीय दक्षिणं बाहुमुद्धरतेऽवधत्ते सव्यमिति श्रुत्या विन्यासविशेषावच्छिन्नद्रव्यम् । तत्र आश्रमभेदेन अजिनं वासो वेति अजिनवासो रूपद्रव्यविशेषस्याभिधाने सत्यपि तस्योपलक्षणपरतामभिप्रयता मनुना 'कार्पास मुपवीतं स्यात् विप्रस्योर्ध्ववृतं त्रिवृदि'ति वाक्येन नवतन्तुकत्रिग्रन्थियुक्तत्रिसूत्रविशेष एव मुख्ययज्ञोपवीतमिति प्रत्यपादि । अजिनवासःप्रभृतिद्रव्यविशेषेषु सर्वकालधारण सौकर्याय सर्वैर्नवतन्तुकत्रिग्रन्थियुक्तत्रिसूत्ररूपयज्ञोपवीतमेव धार्यते । तदेव मुख्यं यज्ञोपवीतं 'उपासने गुरूणामित्यादिना आपस्तम्बेन कतिपयकर्म विशेषाङ्गतया सूत्रितम्

तत्र अजिनं वासोवेति श्रुतिप्रतिपादितस्यैव यज्ञोपवीतस्य 'यज्ञोपवीतमिह वासोविन्यासविशेषः' इति वासःपरतयोज्जलायां व्याख्यानं कृतम् ।

आपस्तम्बेन यज्ञोपवीतं नोक्तमिति प्रवादस्तु आपस्तम्बगृह्य सूत्रे उपनयनप्रकरणे यज्ञोपवीतं नाभिहितमिति रीत्या नेयः, न तु सर्वत्र-धर्मसूत्रे उपासने गुरूणामित्यादिना यज्ञोपवीतस्य तैरेव स्पष्टमभिहितत्वात् । अत एव कण्ठभूषणगृह्यरत्नतात्पर्यदर्शनादि निबन्धनकाराः इदमेव सूत्रं मुख्ययज्ञोपवीतधारणविषये मूर्धन्यप्रमाणतया उपनयप्रकरणे उदाजहुः ।

"अपि वा सूत्रमेवोपवीतार्थे" इत्यत्रतु गृहस्थानां नित्यमुत्तरं वासः कार्यमिति पूर्वसूत्रविहितोत्तरवाससोऽभावे तदनुकल्पपरतया उत्तरीयवासः प्रतिनिधित्वेन यज्ञोपवीताकारं सूत्रान्तरमेव विहितं न तु सर्वाश्रमसाधारण्येन ।

इत्थं श्रुतिस्मृतिसूत्रादिप्रमाणेषु क्वचिदपि अनुकल्पभूतमन्त्ररहित गौणवासोयज्ञोपवीतपरवचनस्यादर्शनात् गौणौपवीतस्य न शास्त्रविहितत्वं, अपि तु अजीवज्ज्येष्ठपितृकैरनिषिद्धकालेषु सौविध्याय उपरिवाससो यज्ञोपवीताकारेण धारणमात्रेण वस्त्रयज्ञोपवीतत्वेन भाक्तव्यवहार इति सुधियो विदाङ्कुर्वन्तु ।

वार्धक्यवशात् एतद्ग्रन्थसम्पादनादिकार्यभरो मया मदन्तेवासिचि. कृष्णश्रीनिवासयोः निवेशितः । ताभ्यां विनाऽनवधानं सम्यक् समपादि । एतस्योः सर्वविधमङ्गलान्यनुगृह्णन् सर्वेश्वरः श्रीनिवासः प्रसीदतु ।

इति प्रबन्धपुत्रः
अय्या श्रीदेवनाथाचार्यः

# उपोद्घातः

**सौशील्योल्लाससीम्नो वरदगुरुमणेर्लब्धमन्त्रोपदेश-**
**स्त्रय्यन्तार्यं विरक्तौ शरदमृतकरं यामुनेयान्वयाब्धेः ।**
**विद्याभिर्वेङ्कटेशं पितरमनुसरन् देशिकः श्रीनृसिंहः**
**पायाद्वेदान्तरामानुजमुनिकरुणालब्धभूमा सदा माम् ॥**

इह खलु प्राणिनस्सर्वेऽप्यनेकजन्मार्जितपुण्यप्रभावै र्मनुष्यशरीरमासादयन्ति । तदुक्तं—

महता पुण्यपण्येन क्रीतेयं कायनास्त्वया ।
कदाचिल्लभते जन्तु र्मानुष्य पुण्यसञ्चयात् ॥

इति । तत्र पुण्यजनकं कर्म किं ? किं वा पापजनकं कर्मेत्यत्र मूलप्रमाणं वेद एव । तस्य वेदस्यानेकशाखाभिरनेकवर्त्मतया ततो नैव सर्वेषां जनानां यथावज्ज्ञानं सुशकमिति वेदविद्भि र्महर्षिभिर्वेदोक्ततत्तदर्थाभिधायिका मनुयाज्ञवल्क्याद्यनेकस्मृतयो धर्मप्रतिपादकतयोपनिबद्धाः । यथाचोक्तं—

स्मृतयो बहुरूपाश्च दृष्टादृष्टप्रयोजनाः ।
तमेवाश्रित्य लिङ्गेभ्यो वेदविद्भिः प्रकाशिताः ॥ इति

तदिह धर्मानुष्ठाने गौतमापस्तम्बादितत्तन्महर्षिभिर्विरचितास्तत्तद्धर्मसूत्रादिग्रन्था एव प्रमाणत्वेन वैदिकै स्सर्वैरप्यद्यावधि परिगृह्यन्ते, तदनुसारेण वर्णाश्रमधर्माश्चानुष्ठीयन्ते । तत्र 'चत्वारिंशता संस्कारै-स्संस्कृतः ( गौ० ध० ) इति सूत्रेण त्रैवर्णिकानां यथायोग्य-मधिकारिणामुपनयनादि चत्वारिंशत्संस्कारा विहिताः । तेषु च सन्ध्यादिसकल कर्मस्वनुपनीतानामधिकारविरहेण प्रथममुपनयनं भगवान् महर्षिगौतमः प्राह—

उपनयनं नाम—वेदाध्ययनार्थमाचार्यसमीपे माणवकस्य नयनं अध्ययने चाधिकारो यज्ञोपवीतिनामेव यज्ञोपवीत्येवाधीयीत ( तै० आ-२-१) इति श्रुतेः । अतो दर्शपूर्णमासयोः प्रयाजवत् प्रागुपनयनात् ( तदितिकर्तव्यतात्वेन ) तदङ्गतया माणव-कस्य यज्ञोपवीतधारणं कारयन्त्याचार्याः ।

तच्च यज्ञोपवीतं मुख्यं गौणं चेति द्विविधम् । तत्र नवतन्तुकत्रिग्रन्थियुक्त त्रिसूत्रात्मकं यज्ञोपवीतमेव मुख्यं 'नव वै त्रिवृत्' इति श्रुतेः 'कार्पासमुपवीतं स्याद्वि-प्रस्योर्ध्ववृतं त्रिवृत्' इति मनुनाऽभिहितत्वाच्च ।

अपि च यज्ञोपवीतपदस्य 'सव्यस्यांसस्योपरिष्टाद्ग्रीवां हृदयं पृष्ठं च परिगृह्य दक्षिणस्य हस्तस्याधस्तादुपवीतं भवतीति बोधयाननिरुक्त्या,

'उद्धृत्य दक्षिणे पाणावुपवीतीत्युच्यते द्विजः'
'उद्धृत्य दक्षिणं बाहुं सव्यांसे तु समर्पितं'
'कण्ठे तु सव्ये निक्षिप्तमुपवीतमुदाहृतं

इत्यादिमनुव्यासकात्यायनवचनैश्चोपबृंहितया "दक्षिणं बाहुमुद्धरतेऽवधत्ते सव्यमिति यज्ञोपवीतं" (तै-आ-२-१) इति श्रुत्या निरुक्तविन्यासविशेषावच्छिन्नसूत्रे शक्ति सिद्धयति। अतस्तदेव मुख्यम्। वासोविन्यासात्मकयज्ञोपवीतं तु गौणमत एव नवतन्तुकत्रिग्रन्थियुक्तत्रिसूत्ररूपमुख्ययज्ञोपवीतालाभे वासोदर्भादीनामपि यज्ञोपवीतत्वधर्मितया प्रतिपादनमपि तत्र तत्र सङ्गच्छते। यथा च गोभिलादि महर्षयः प्राहुः—

यज्ञोपवीतं कुरुते सूत्रं वस्त्रं कुशं च वा।
कार्पासक्षौमगोबालशणवल्कतृणोद्भवं ।
सदा संभवता धार्यमुपवीतं द्विजातिभिः॥ इति

## प्रकृतग्रन्थशैली

अत्र केचन कानिचिदापस्तम्बसूत्राणि तद्व्याख्यातृवचनानि प्रकीर्णानि स्मृत्यादिवचनानि च प्रमाणतयोदाहृत्य वासोविन्यासात्मकगौणयज्ञोपवीतं ब्रह्मचर्यादिसर्वाश्रमसाधारण्येन सन्ध्यादिकर्मानुष्ठानकाले कर्मार्थतया, पुरुषार्थतया च सदैव धार्यमिति प्रतिपादयन्ति। एतद्ग्रन्थरचयितारः श्रीशैलशतमखचतुराम्नायनावल्पाक्क अय्या श्रीनृसिंहतातयार्यास्तु वादिभिर्गौणयज्ञोपवीतं वासोविन्यासरूपं सदा सर्वैर्धार्यमिति विषये उदाहृतानां प्रमाणानां स्वमतानुकूलत्वमेव न तु प्रतिकूलत्वमिति सुनिपुणं निरूप्याजीवज्ज्येष्ठपितृकै र्गृहस्थैः श्राद्धतर्पणादिनिषिद्धकालव्यतिरिक्तकालविशेष एव गौणयज्ञोपवीतं धार्यमिति सविमर्शं स्थापयन्ति। न पर मेतावत् वादिभिरप्रदर्शितानि प्रमाणान्यनेकानि विचार्य स्वमतं प्रतिष्ठापयन्ति। अतोऽयं ग्रन्थः प्रौढविद्वत्तोपकरशैल्या सन्दृब्ध इत्येतद्द्रष्टृणां विदुषां स्पष्टं भविष्यति। प्रायः प्राचीनग्रन्थकारास्सर्वेऽपि परमतमिराकरणपूर्वकमेव स्वमतं स्थापयन्तीति रीतिर्दृश्यते प्रकृतग्रन्थकर्ताराऽपि तथैवाकार्षुः। अत एव वादिनामिदमवश्यकर्तव्य मिति न्यायसूत्रकारोऽपि "तत्त्वाध्यवसायसंरक्षणार्थं जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं कण्टकशाखावरणवत्" इति सूत्रेण सूचयां बभूव। अतो वादरसिका ईदृशेषुग्रन्थेषु न दोषदृष्टिं कुर्युः। अपि च हृदयाद्यन्तुदाश्शब्दा यदि प्रयुज्येरन् तदैव ते ग्रन्था अनादरणीया भवन्ति, प्रकृत ग्रन्थे तु न कुत्राप्यरुन्तुदाश्शब्दाः प्रायुज्यन्त। केवलं पूर्वपक्षानुवादपूर्वकं तत्समाधानमात्रमुक्तमतोऽयं विवेचनशीलानां तत्त्वदृष्टि विदधनां निर्मत्सराणां विदुषा मादरणीय इत्यत्र नास्ति सन्देहः।

## ग्रन्थप्रतिपाद्यविषयसंग्रहः

### ब्रह्मचारिणां गौणोपवीतधार्यत्वशङ्का—तन्निरासौ

१. "उपासने गुरूणां वृद्धानामतिथीनां होमे जप्यकर्मणि भोजन आचमने स्वाध्याये च यज्ञोपवीती स्यात्" (१.५.१५.[१])

इत्यापस्तम्बधर्मसूत्रव्याख्यायामुज्ज्वलायां 'अत्र यज्ञोपवीतं वासोविन्यासविशेष' इति कथनात् गौणयज्ञोपवीतपरत्वमस्य सूत्रस्य प्रतीयते। ब्रह्मचारिप्रकरणे सूत्रस्यास्य पठितत्वात् तत्साधारण्यं च ज्ञायते। अतो ब्रह्मचारिणाऽपि वासोविन्यास रूपगौणोपवीतं धार्यमिति पूर्वपक्षिणोऽभिप्रयन्ति।

अत्रायं सिद्धान्तः--अस्य सूत्रस्य व्याख्यात्रोज्ज्वलाग्रन्थकृता 'सर्वेषामेव कर्मणां शेषभूतमाचमन विधास्यन् तदुपयोगिनो विधीनाह" इत्यवतारितत्वेनाचमन-शेषतया मुख्ययज्ञोपवीतमनेन विधीयते। आचमनं च सर्वकर्माङ्गतया सर्वाश्रम-साधारणं, आश्रमेषु सर्वप्रथमो ब्रह्मचर्याश्रमस्तत्रैवोपनयनात्परं कर्मार्हतासिद्धेस्त-त्प्रकरणे सूत्रमिदं पठितं तावता गौणोपवीतं ब्रह्मचारिसाधारणमिति कथनं न युक्तम्।

स्मृतिमुक्ताफले, कण्ठभूषणे आपस्तम्बगृह्यव्याख्याने तात्पर्यदर्शने च सूत्रस्यास्योपनयनप्रकरणे प्रमाणमूर्धन्यतयोपात्तत्वेन मुख्ययज्ञोपवीतपरत्वमवसीयते।

यज्ञोपवीतं वासोविन्यासविशेष इत्युज्ज्वलापङ्क्तेस्त्वयं भावः—"वाससा यज्ञोपवीतार्थान् कुर्यात् तदभावे त्रिवृता सूत्रेणवा' इति ऋश्यशृङ्गस्मरणेन ऋश्यशृङ्गमते वासस एव मुख्यत्वेन प्रतीयमानत्वात्तदभिप्रायकमिदं 'उपासने' इति सूत्रमिति।

वस्तुतस्तु 'अजिनं त्वेवोत्तरं धारयेत्' इत्यापस्तम्बसूत्रेण ब्रह्मचारिण उपरितन भागेऽजिनस्यैव धार्यत्वेन विधानात् द्वितीयवस्त्रस्य निषेधसिद्ध्या वासोविन्यासरूपं गौणोपवीतं तेषां सुदूरपराहतमेव।

यदपि—'कृतोपनयनोवेदानधीयीत द्विजोत्तमः' इत्युपनीतमधिकृत्य

वसेदविकृतं वासः कार्पासमकषायकं।
तदेव परिधानार्थं शुक्लमच्छिद्रमुत्तमम्॥

इति व्यासेनाभिहितं, तत्र अकषायकं कार्पासं वासोऽविकृतं वसेदितिपूर्वार्धेनान्तरीय-मभिधीयते, उत्तममच्छिद्रं शुक्लं तदेव—तज्जातीयमेव (अन्यत्) परिधानार्थं मुत्तरीयार्थमित्युत्तरार्धेनोत्तरीयमुच्यते। "वाससी परिधाय' इति बोधायनसूत्रे

द्विवचनेन वस्त्रद्वयस्य परिधानकर्मत्वाभिधानात्, तथा 'अहतमुत्तरं वासः परिधत्ते' इत्यापस्तम्बसूत्रे चोत्तरवाससः परिधानकर्मत्वोक्तेश्च परिधानशब्दवाच्यत्वमुत्तरीयस्या क्षतम्। उत्तरोत्तरीयशब्दौ च समानार्थकावेव—'एणेय मजिनमुत्तरीयमिति पारस्कर सूत्रप्रयुक्तोत्तरीयपदस्थाने आपस्तम्बेन 'अजिनं त्वेवोत्तरं धारयेत्' इत्युत्तरपदस्य प्रयुक्तत्वात्, तथा मनुनाऽपि 'द्वितयं स्नातकानां स्यादन्तर्वासस्तथोत्तरं' इति स्नातकमधिकृत्यान्तर्वासः प्रतिकोटित्वेनोत्तरीयवाचकतयोत्तरपदप्रयोगस्य कृतत्वाच्च। एवं चोदाहृतमनुव्यासवचनै स्स्नातकब्रह्मचारिणोरुत्तरीयसिद्धे यज्ञोपवीतपदस्य यथा पूर्वोक्तबोधायननिरुक्त्यादिबलात् सव्यस्यांसस्येत्यादिविन्यासविशेषविशिष्टसूत्रादौ शक्तिरिष्यते तथैवोत्तरीयस्यापि विन्यासविशिष्टद्वितीयवस्त्र एव शक्ते स्स्वीकारात् प्रकृते 'तदेव **परिधानार्थं** द्वितयं **तथोत्तरं** इति वचनाभ्यां विशेष्यभूतं वास उद्दिश्य विशेषणीभूतविन्यासविशेषस्यैव विधानात् ब्रह्मचारिणा स्नातकेन वा केवलसव्यांसे कटिदेशमात्रे वा द्वितीयवस्त्रधारणेनैतच्छास्त्रार्थोऽनुष्ठितो न भवतीति वासोविन्यासरूपं गौणयज्ञोपवीतं ब्रह्मचारिस्नातकाभ्यां धर्तव्यमिति।

अत्र ब्रूमः—तदेव परिधानार्थमित्यत्र तच्छब्देन पूर्वार्धोक्तमन्तरीयं परामृश्य परिधानरूपद्वितीयवस्त्रकार्ये तदेव विधीयते, तच्छब्दस्य व्यक्तिपरत्वे संभवति जात्यालम्बनस्यायुक्तत्वात् तज्जातीयस्यान्यस्य ग्रहणं न युक्तं, तदेवेत्येवकारेण द्वितीयवस्त्रं च निषिद्धयते। अतश्च प्रकृते प्रथमार्धेनान्तर्वस्त्रधारणविधिरुत्तरार्धेन बहिर्वस्त्रनिषेधश्च सिद्धयति। अत एव 'विशेषस्तु समाख्यातः—वासः कृष्णाजिनं पर' मिति गृहस्थादिविलक्षणतया ब्रह्मचारिणां कृष्णाजिनमेवोपरिवासस्स्थाने धार्यतया विधीयते।

आस्तां वा जात्यालम्बनेनोत्तरीयसिद्धिस्तथाऽपि आपस्तम्बेन 'अजिनं त्वेवोत्तरं धारये दिति स्वमते वस्त्रोत्तरीयस्य निषिद्धत्वात् वासश्शाणींत्यादिना शाण्याः काषायं, चैकेवस्त्रमिति काषायस्य चोक्तत्वेन व्यासवचनावगतस्या काषायकार्पासस्यानापस्तम्बि विषयत्वमङ्गीकर्तव्यम्। अनापस्तम्बिनामपि निरूक्तवचनेनोपरिवासोमात्र सिद्धयेत्, न तु विन्यासविशिष्टवस्त्रं यतो हि यज्ञोपवीतपदस्य विन्यासविशेषावच्छिन्नसूत्रे शक्तिग्राहकतया बोधायननिरुक्तिमनुव्यासवचनादिप्रमाणानि सन्ति तथा किमपि प्रमाण मुत्तरोत्तरीयपदयोर्विन्यासविशिष्टद्वितीयवस्त्रे शक्तिग्राहकं नास्ति, अन्तर्वास स्तथोत्तरं, नोत्तरीयमधः कुर्यान्नोपर्याधस्त्यमम्बरं अन्तरीयं विना वाप्युत्तरोयं विना यथा' इत्यादिषु अधोवासः प्रतिकोटित्वेनोपरिवासोमात्रे उत्तरोत्तरीयशब्दयोः प्रसिद्धे रूत्तरोत्तरीयशब्दावुपरिवासोमात्रमभिदधाते न तु विन्यासविशिष्टवस्त्रमतः पूर्वोक्तमनु-व्यासवचनाभ्यां स्नातकब्रह्मचारिणो गौणोपवीतप्रतिपादनं न शोभनम्।

## गृहस्थैस्सदा गौणोपवीतं धार्यमिति शंका-तत्परिहारौ

आपस्तम्बधर्मसूत्रे अथ गृहमेधिनो व्रतं' इत्युपक्रम्य नित्यमुत्तरं वासः कार्यमिति सूत्रेण विन्यासविशेषविशिष्टवासस एव सदा धार्यत्वेन प्रतिपादनात् गृहस्थैस्सदैव गौणयज्ञोपवीतं धार्यं न तु कालविशेष एवेति वदन्ति—अयमाशयः। नित्यमुत्तरं वासः कार्यमिति सूत्रस्थोत्तरपदेनोपवीतमेवाभिधीयते न तूपरितनवस्त्रमात्रं, यतो ह्येतदनन्तरसूत्रेण अपि वा सूत्रमेवोपवीतार्थे' इत्यनेन मुख्यकल्पत्वेन विहितस्य वाससोऽलाभे (असंभवे) अनुकल्पतयोपवीतार्थत्वेन नवतन्तुकत्रिग्रन्थियुक्तत्रिसूत्रं वोपरि भागे धारणीयमिति प्रतिपादनात् मुख्यकल्पानुकल्पयोरेककार्यकारित्वावश्यंभावनियमात्तदनुसारेण प्रकृतेऽपि मुख्यकल्पतया वासोविन्यासात्मकगौणोपवीतस्यैवोत्तरपदवाच्यत्वप्रतिपादनं युक्तम्। अत एव 'वस्त्रं यज्ञोपवीतार्थे सूत्रं वा त्रिगुणीकृतं' इति स्मृत्यन्तरसंवादोऽप्युपपद्यते। एवं च नित्यमुत्तरं वास इति सूत्रस्थोत्तरं वास इत्यनेन विन्यासविशेषविशिष्टवस्त्रोपवीतस्यैव कथनात् पुरुषार्थतया सदैव गौणोपवीतं धार्यमिति।

अत्रोच्यते—नित्यमुत्तरं वासः कार्यमित्यत्र उत्तरं वास इत्युपरिवासोमात्रं प्रतिपाद्यते, तस्यैव सदा धार्यत्वं नित्यं कार्यमित्यंशेन विधीयते न तु विन्यास विशिष्ट द्वितीयवस्त्रं उत्तरपदस्य तादृशार्थप्रतिपादकत्वं न संभवतीति पूर्वमेव प्रपञ्चितम्।

यच्च नित्यमुत्तरं वासः कार्यमित्यनन्तरं 'अपि वा सूत्रमेवोपवीतार्थे इति सूत्रे अनुकल्पत्वेन सूत्रस्योपवीतार्थे विधानात् मुख्यस्य वाससोऽपि तत्रैवोपवीतार्थं एव विधातव्यत्वादिति हेतुप्रदर्शनं, तदपि न युज्यते—पूर्वापरसूत्र-तद्व्याख्यानग्रन्थसन्दर्भविरोधापत्तेः। उज्ज्वलायां हि "उपसने गुरूणा'मितिसूत्रव्याख्यानावसरे वाससोऽसंभवेऽनुकल्पं वक्ष्यति अपि वा सूत्रमेवोपवीतार्थं इति। मनुरप्याह—कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं त्रिवृदिती" त्यभिहितम्। अनेन व्याख्यानवचनेन मुख्ययज्ञोपवीत धर्मिणो वाससोऽसंभवे सूत्रस्यानुकल्पपरत्वेन अपि वा सूत्रं' इति सूत्रप्रवृत्तेर्व्यक्तत्वेन ऋष्यशृङ्गमतेन मुख्ययज्ञोपवीतस्य विन्यासविशेषविशिष्टवस्त्रस्यानुकल्पभूतमापस्तंबमते मुख्यं च नवतन्तुकत्रिग्रन्थिसहितत्रिसूत्ररूपं यज्ञोपवीतमेव 'अपि वा' इति सूत्र प्रतिपाद्यं नित्यमुत्तरं वासः कार्यमिति तु द्वितीयवासोमात्रविधायकमित्यवगम्यते।

किंच यदि 'अपिवेतिसूत्रस्य नित्यमुत्तरं वास इति पूर्वसूत्रविहितोत्तरवासोऽनुकल्पपरत्वं तदा अपि वा सूत्रमित्येवालं, तावन्मात्रेण तदर्थत्वलाभादुपवीतार्थं इति व्यर्थं, सूत्रमेव तदर्थ इत्येतावतैवाव्यवहितपूर्वसूत्रोक्तोत्तरीयपरामर्श संभवात्।

अपि च नित्यमुत्तरमिति विहितस्य प्रकरणेन गृहस्थासाधारणतया तदनुकल्प-

विधायकत्वे तस्यापि तदसाधारण्यापत्त्या 'अपि वेति सूत्रे अपि वा सूत्रमेव **सर्वेषा** मुपवीतकृत्ये भवतीति व्याख्यानं चासङ्गतं भवेत् ।

अन्यत्र—नित्यमुत्तरमिति पूर्वसूत्रे कार्यमनभिधाय अनुकल्पपरद्वितीय सूत्रेऽनुकल्पस्य फलाभिधानात्पूर्वप्रतिपन्नमुख्यस्यानुकल्पफलकत्वाभिधाने वैपरीत्येन कथनलक्षणमग्रान्थिकत्वं च स्यात् ।

परं च—पुष्टिकाम प्रयोगे 'सोत्तराच्छादनश्चैव यज्ञोपवीती भुञ्जीत' इति सूत्र प्रणयनमपि निष्फलं भवत्पक्षे भोजनकाले सर्वसाधारण्येन 'उपासने गुरुणामिति नित्य-मुत्तरमिति च सामान्यविशेषविधिभ्यां भवदुक्तयज्ञोपवीतसिद्धेः । अस्माकं पक्षे तु उत्तराच्छादनमुपरि वासस्तेन भोजनकाले पुष्टिकामो यज्ञोपवीतं कृत्वा भुञ्जीतेत्यने-नैव विधीयमानत्वात्तेनापि प्रमाणान्तरेण भोजनकाले वासोविन्यासरूपोपवीतस्य प्राप्त्यभावाच्च सार्थकम् । अतो नित्यमुत्तरं वास इत्यत्रोपरिवासोमात्रं विधीयत इत्यास्थेयम् ।

## यतीनां गौणोपवीतसिद्धिशंका-तन्निरासौ

**उपवीतोत्तरासंग** दण्ड कौपीन केवलाः [ मेखलाः ]
कुण्डिकाछत्रवासांसि यतिर्दध्यात्तु नित्यशः ।

मेखलां चत्वार्युपवीतानि एकं वोपवीतं कृष्णाजिन**मुत्तरीयं** च पूर्ववत्परिदधाति ।

**योगपट्टोबहिर्वासो** मात्राख्या विंशतिस्स्मृताः ।
त्रयस्तु वैणवा दण्डा यतेः कषाय**वाससौ** ।
एकवासा द्विवासाश्च शिखा यज्ञोपवीतवान् ।
कमण्डलुकरो विद्वान् त्रिदण्डो याति तत्पदम् ॥

इति वृद्धहारीत विखनस्सूत्र यतिधर्मसमुच्चय व्यास वचनस्थै रुत्तरासंगोत्तरीय योगपट्ट वाससी इति द्विवचनान्तशब्दैश्च यतीनामप्युत्तरीय धारणप्रतिपादनात् उत्तरीयपदस्य पूर्वोक्तरीत्या वासोविन्यासात्मकगौणोपवीते शक्तेस्स्वीकारात् यति-भिरपि निरुक्तगौणोपवीतं धार्यमिति विवदन्ते वादिनः ।

तत्रेदं वदामः—वाससी, द्विवासा बहिर्वास इत्यादिशब्दैः पूर्वोदाहृतवचनगतै रुत्तरीयं नाभिधीयते ।

'अन्यत्प्रयतं कौपीनं बहिर्वासश्च परिधाय' इति शौनकसूत्रे बहिर्वासः प्रति सम्बन्धित्वेन कौपीनस्य स्पष्टमभिधानात् 'त्रिदण्डजलपवित्रशिखायज्ञोपवीतिनोऽन्त-

वासोधारिणः' इति पराशरसूत्रस्थमन्तर्वासः पदं कौपीनपरं बहिर्वासःपदं च कटिवेष्टनवस्त्रपरमित्येव लभ्यते न तु भवदभिमतं वासोविन्यासात्मकमुत्तरीयम् ।

किञ्च 'अथ परिव्राजको लिङ्गो·····वासो बिभृयान्नोत्तरीय मित्यादिवचनशतेन यतीनां द्वितीयवासोनिषेधश्रवणादुत्तरीयमेव न सिद्धयति ।

एवं सति यतिधर्मसमुच्चये 'योगपट्टो बहिर्वास इति कथनं कथं सङ्गच्छत इत्याशंकायां तत्रैव तद्वचनस्य वृद्धातुरादिपरिव्राजकविषयत्वमज्ञानिविषयत्वं वेष्यते,

सम्यग्ज्ञानिना मरोगदृढगात्राणां यतीनां तु

उपवीतं त्रिदण्डं च पात्रं जलपवित्रकम् ।
कौपीनं कटिसूत्रं च न त्याज्यं यावदायुषम् ॥

इति पञ्चमात्राधारणमेवावश्यं कर्तव्यमिति निगमनकरणात् योगपट्टो बहिर्वास इत्यस्य न परिव्राजकसामान्यविषयत्वमभिधातुं शक्यते । अतो भूयसां स्याद्बलीयस्त्वमिति न्यायेन वचनशतनिषेधबलात् यतीनामुत्तरीयस्यैवाप्राप्तत्वेन गौणोपवीत वर्णनं सुतरां न सङ्गच्छत इति ।

## यज्ञोपवीतं कृत्वाऽधो निपपातेति श्रुतिगतयज्ञोपवीतपदस्य त्रिवृदधिकरण-न्यायेन गौणोपवीतपरत्वाशङ्का-तन्निरासौ

'यज्ञोपवीतं कृत्वाऽधो निपपात' इति श्रुत्या यज्ञोपवीतं कृत्वाऽधो निपतेत् इति विधिरुन्नीयते । अत्र यज्ञोपवीतपदं त्रिवृदधिकरणन्यायेन विन्यासविशेषावच्छिन्नवासःपरं, न स्मृत्युक्तनवतन्तुकत्रिग्रन्थियुक्तत्रिसूत्रपरम् । त्रिवृदधिकरणेहि 'त्रिवृद्वहिष्पवमानमित्यत्र त्रिवृच्छब्दस्य त्रिवृद्रज्जुरिति लोके व्यवहारात् त्रैगुण्यपरत्वमुत वाक्यशेषात् स्तोत्रीयानवकपरत्वं वेति संशय्य पदपदार्थसंबन्धानां लोकवेदयोस्तुल्यत्वात् लोके य एवार्थस्स एववेदेऽपीति त्रिवृच्छब्दस्त्रैगुण्यपर इति पूर्वपक्षः कृतः । सिद्धान्तस्तु त्रिवृद्वहिष्पवमानमित्युक्त्वा 'उपास्मै' इति स्तोत्रीयानवकाम्नानात् त्रिवृच्छब्दस्य स्तोत्रीयानवकमर्थं इत्येवं तच्छब्दार्थकथनपरत्वमवसीयते । तथा सति 'नवभिस्तुवन्ति' इति श्रुत्यन्तरं चानुगृहीतं भवति । अन्यथा विरोधापत्तेः । अतस्स्तोत्रीयानवकाम्नानरूपवाक्यशेषात् त्रिवृच्छब्दस्य रूढ्या स्तोत्रीयानवकार्थकत्वमङ्गीकर्तव्यम् । इत्थं च वाक्यशेषसहितस्थले त्रिवृच्छब्दस्य वाक्यशेषबलात् स्तोत्रीयानवके रूढौ निश्चितायां वाक्यशेषरहिते **त्रिवृदग्निष्टोम** इत्यादौ रूढिबलात् 'त्रिवृच्छब्दस्स्तोत्रीयानवकार्थ इति

प्रतिपादितः। प्रकृतेऽपि तेनैव ( सिद्धान्त ) न्यायेन 'यज्ञोपवीत्येवाधीयीत' इत्यत्र 'अजिनं वासो वा दक्षिणत उपवीय दक्षिणं बाहुमुद्धरतेऽवधत्ते सव्यमिति यज्ञोपवीतं (तै. आ. २. १ ) इति वाक्यशेषात् रूढ्या विन्यासविशेषविशिष्टवासोऽभिधायकं यज्ञोपवीतपदमिति निश्चिते वाक्यशेषरहिते 'यज्ञोपवीतं कृत्वा' इत्यत्रापि विन्यास-विशेषावच्छिन्नवासःप्रतिपादकत्वं यज्ञोपवीतपदस्य रूढ्या सिद्धयति। ततश्च वासः, विन्यासविशेषावच्छिन्नं कृत्वा प्रणामं कुर्यादित्यर्थलाभात् प्रणामकाले वासोविन्यासरूप गौणोपवीतं धार्यमिति प्रतीयत इति पूर्वपक्षयां चक्रिरे। तत्रेत्थमुत्तरमभिधीयते। यज्ञोपवीत्येवाधीयीत' इत्यत्र यज्ञोपवीतपदं मुख्ययज्ञोपवीतपरमेव न गौणोपवीतपरं यतो हि निरुक्तवाक्यशेषे 'उपवीय दक्षिणं बाहुमुद्धरतेऽवधत्ते सव्यमिति यज्ञोपवीत-मित्येतावन्मात्रमेव यज्ञोपवीतशब्दार्थः, अजिनं वासो वेतिद्रव्यविधिरिति भट्टभास्करेण भाष्ये व्याख्यातं, एवं चाजिनवाससोर्यज्ञोपवीतशब्दार्थानन्तर्गतत्वेन न वासो विन्या-सात्मकगौणोपवीतं साधयितुं शक्यम्। किन्तु सामान्येनाजिनवाससोर्ग्रहणस्य प्रदर्श-नार्थत्वमाश्रित्य सर्वद्रव्यबोधकतासंभवेऽपि ब्रह्मसूत्रे यज्ञोपवीतपदस्य प्रयोगप्राचुर्यात् 'नववैत्रिवृत्' कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं त्रिवृत्' इत्यादि श्रुतिस्मृतिभिश्शिष्टा-चाराच्च सूत्रपक्षस्यैवाश्रितत्वाच्च पार्थदाशरथ्यादिशब्दवत् सूत्रासाधारणं यज्ञोपवीत-पदम्। एतदभिप्रेत्यैव—

उपवीतं ब्रह्मसूत्रं सूत्रं यज्ञोपवीतकम्।
यज्ञसूत्रं देवलक्ष्म इत्याख्याष्षट् क्रमेणतु॥

इति भारद्वाजवचने उपवीतादिपदस्य यज्ञसूत्रपर्यायत्वमभिहितम्। ततश्च यज्ञोपवीतं कृत्वेत्यस्य सम्यक् कृत्वेत्यर्थः। कृतस्य करणोक्तिरशिथिलीकरणरूपसम्यक्करणा-भिप्रायेण। केवलावस्थानादिसमये ग्रीवाव्यवधानेन स्थितस्यापि प्रणामादिसमये तत्सन्निधापनस्य लोके प्रणामादिसन्नेद्धेषु दृश्यमानत्वात्। प्रणामसमये यज्ञसूत्रस्य ग्रीवाव्यवहितांसशिखरादाववस्थाने प्रणामकाले तद्भ्रंशप्रसङ्ग इति ग्रीवासन्निहित-देशावस्थापनेन यज्ञसूत्रं सम्यक् कृत्वा प्रणनामेत्यर्थः। अस्मिन् पक्षे कृत्वेत्यस्य सम्यक्कृत्वेत्यर्थकरणे क्लेशोऽस्वारस्यं च प्रसज्यत इति यदि मन्यते तदा विन्यास-विशेषरूपं मुख्ययज्ञोपवीतं कृत्वेत्यर्थः। तत्र च विशेष्यभूतं सूत्रमुद्दिश्य निरुक्तविन्यास विशेषोविधीयते। प्रणामकाले निवीतप्राचीनावीतादिविन्यासविशेषनिषेधो विधेः फलम्। नात्र त्रिवृदधिकरणन्यायः प्रवर्तते-तस्य लोके वाक्यशेषे च प्रतीयमानयोरर्थयोः यंत्रविरोधस्तद्विषयत्वात् प्रकृते यज्ञोपवीतपदस्य लोके वेदे च 'सव्यादंसात्परि भ्रष्टस्येत्यादिविन्यासविशेषावच्छिन्नद्रव्यवाचित्वस्य समानतया प्रतिपादितत्वात् न विरोधगन्धोऽपि अतो यज्ञोपवीतं कृत्वेत्यत्र यज्ञोपवीतपदं सूत्ररूपमुख्ययज्ञोपवीत परमेवेति।

## ग्रन्थकर्तृवैभवं, मातृकाविवरणं च

श्रीमन्नाथयामुनमुनिकुमारतातदेशिकाण्णयार्यमहादेशिकप्रमुखबहुतरविशिष्टाद्वैतवेदान्तसंस्थापकदिव्यसूर्यवतारचारूतरे श्रीशैलपूर्णशतमखचतुराम्नाय तातयार्यवंशे काञ्चीमण्डलान्तर्गते नावलाक्कक्षेत्रे कलियुगादिपञ्चषष्टयधिक नवशत्युत्तर चतुस्सहस्त्रसंख्यात (४९६५) रक्ताक्षिवत्सर [ख्रिस्ताब्दे (१८६४)] कार्तिकपूर्वफल्गुनीनक्षत्रे कृतावतारा: प्रकृतग्रन्थकर्तार अय्या श्री नरसिंह्यतातयार्यमहादेशिका:। एते बाल्येवयसि अधीतसामान्यविशेषसकलशास्त्रा बहुकालं महीन्द्रपुरक्षेत्रे शिष्यगणानध्यापयामासु:। शास्त्रोक्तार्थस्यान्यथाऽनुष्ठाने महाननर्थ आपद्येतेतिभिया स्वसंप्रदायानुवर्तिनां वास्तविकार्थबोधनाय चानेकश्रुतिस्मृतिमीमांसान्यायपूर्वाचार्यसूक्त्यादिप्रमाणपर्यालोडनेन महत्वपूर्णोऽयं यज्ञोपवीततत्वविमर्शाख्यो ग्रन्थस्तैर्व्यरचि। यद्यप्ययं प्रबन्धस्सर्वाश्रमसाधारण्येन सदा वासोविन्यासरूपं गौणोपवीतं साधयतां कतिपयसंप्रदायानुयायिनां समाधानरूपेणप्रवृत्तस्तथापि पूर्वपक्षिभिरुक्तं सर्वमनूद्य कुत्रचित्तेषामभिप्रायं च स्वपङ्क्तिभिर्विशदीकृत्य सर्वस्यापि प्रत्युत्तरं विना रूक्षशब्दप्रयोगेणानाग्रहेण सरलशैल्या श्रृङ्खि ग्राहिकतया प्रतिपादितमिति ग्रन्थेऽस्मिन् विशेष:।

एते प्रबन्धारो विद्याचार तपोभिर्ऋषितुल्यास्त्रिंशद्वयसि समुत्पन्नोत्कटवैराग्यास्संप्रदायस्यास्य विस्तारचिकीर्षया स्वस्य शारीरकशास्त्रं समुपदिष्टवद्भ्योऽनेकप्रबन्ध निर्मातृभ्यो ज्ञानानुष्ठानवैराग्यनिधिभ्य: श्रीमत्परमहंसेत्यादिविशेषणोपेतेभ्यो यतिवर्येभ्य: वलयपेट्टै स्वामोति प्रथमंप्रसिद्धेभ्य: श्रीमद्वेदान्तरामानुजमहादेशिकेभ्य: सन्यासाश्रमं स्वीकृत्य कुम्भघोणस्य समीपे वलयपेट्टै इत्यग्रहारे मात्रयाऽपि स्खलनं विना यथाशास्त्रं यतिधर्मंपरिपालयन्त: श्रीउवे चिन्तस्वामीति नामान्तरेण स्वाचार्यसमकाले एकक्षेत्रे विरेजिरे। दैवविपाकादस्माकमभाग्यवशाद्वाऽचिरादेव (स्वाचार्यजीवितकाल एव) श्रीवैकुण्डमलञ्चक्रिरे। तदानीं तेषां पार्श्वे समुपस्थितास्तत्सकाशादर्धतन्यायमीमांसादिसामान्यशास्त्रास्सदाचारनिष्ठावन्त आत्मगुणपूर्णा भगवतोऽपर्याप्तामृतस्य वेदपारायणादिकैङ्कर्ये सदैव विनियुक्तात्मान: स्वभावेन आकृत्या च सात्त्विका मधुरभाषिणो भारतसर्वंकारसम्मानित पण्डितराज श्रीशैलतातयार्य D-T-ताताचार्यप्रभृतिशिष्यगणानध्यात्मशास्त्रादिकमध्यापितवन्त आत्मनो वेदान्तशास्त्रमुपदिष्टवतां श्रीमत्परमहंसेत्यादिविशेषणविभूषितानामाचार्याणां श्रीमद्वेदान्तरामानुजमहादेशिकाना मनन्तरकाले वलयपेट्टै स्वामीति विख्याता: श्रीउवे श्रीनिवासतातयार्यमहादेशिका अस्माकं प्रपितामहा इद ग्रन्थरत्नं ररक्षु:। ग्रन्थकर्तृणां निर्याणकाले दशवयस्का स्तेषां पुत्रा स्तैरेव गर्भाष्टमे वयसि उपनयनादिभिस्संस्कृता विरक्ताग्रेसराणां ज्ञानानुष्ठानशेवधीनां नावल्पाक्कं स्वामीति प्रसिद्धानां न्यायादिसकल-

शास्त्रपारंगतानां श्रीउवे नरसिंहतातयार्यमहादेशिकानां सन्निधौ कालेन न्याय-मीमांसादिसामान्यशास्त्रं वेदान्तशास्त्रं चाधीत्य ज्ञानानुष्ठानवैराग्यादिभिर्गुणविशेषै र्निजपितृ गुरूननुसरन्तो गृहास्थाश्रम एव सन्तो विविधशास्त्रप्रवचनादिना नानासु दिक्षु स्वशिष्यद्वारेण विश्रावितस्वकीर्तयस्तथाऽद्यावधि श्रीभाष्यादिग्रन्थप्रवचनादिभि-रात्मकृत्यैश्च स्वसंप्रदायविशदीकरणेनात्मीयपितृपादानां मनोरथं च परिपूरयन्तो राष्ट्रपतिना सभाजिताः श्री उ·वे रामानुजसिद्धान्तभास्कर देशिकदर्शनधुरंधर अय्या श्रीदेवनाथतातार्याचार्यस्संप्रति नवतिवयस्का मुनिसदृशा अद्यापि भारतस्यास्य धर्मप्रतीक इव विराजन्ते। एते पुदुक्कोट्टै राजसभायां प्रधानपरीक्षाधिकारित्वेन गच्छन्त आसन्। ततः प्रत्यागमन काले (कदाचित्) वलयपेट्टै अग्रहारमागतास्तदाऽस्मत्प्रपितामहैः श्रीस्वामिभि र्भवत्पितृवर्याणां श्रीस्वामिचरणानां मूलग्रन्थो मया प्रकाशनेच्छया रक्षित इत्युक्तास्तच्छ्रुत्वा तदनु इमे अलभ्यलाभं मन्वाना स्सहर्षं सभक्ति च तदग्रन्थं तत्रैव प्रतिलिपीकृत्य तेभ्यो मूलं प्रत्यर्पयित्वा स्वयं प्रतिलिपिं संस्थापयामासुश्च। प्रपितामहा अपि प्रकाशनमस्य चिकीर्षन्त एव भगवल्लोकमासदयामासुः।

स्वपितृप्रणीतस्य प्रबन्धस्य सत्यामपि प्रकाशनेच्छाया मिमे अर्थेन विपन्ना एतद्विषये शिथिलितमनसोऽभूवन्। एवं गच्छति काले कदाचित् वाराणसेय संपूर्णानन्दसंस्कृतविश्वविद्यालयाधिकारिसविधे ग्रन्थस्यास्य महिमानमभिधाय प्रकाशनप्रस्तावोऽस्माभिरकारि। तेऽपि ग्रन्थेऽस्मिन् गौरवेण अस्मास्वनुरागेण चैतत्संपादनकर्मण्यस्माकमुत्साहमभिवर्धयामासुः। तदनु विषयममुं श्रीस्वामिनामाचार्य पादानां पुरस्तान्निवेद्य तेषां सकाशान्मूलग्रन्थं प्रतिलिपीकृत्य आन्तमवलोक्य च यथामत्यस्माभिस्समपादि। एतत्प्रकाशनेन श्रीवैकुण्ठवासिनोऽपि श्रीस्वामिचरणाः प्रबन्धारः, तथा यदृच्छया भगवतोऽनुग्रहेण स्ववंशपरम्परायामुत्पन्नैरेव लधोयोभिरप्य-स्माभिरस्य प्राकाश्यविधानात्स्वाभिसन्धिः प्रपूरित इति अस्माकं प्रपितामहाः श्रीस्वामिपादाश्च प्रसीदेयुः।

एवं नावल्पाक्कक्षेत्रे अद्यापि स्वतेजोभिस्सूर्यइव प्रकाशमाना अस्माकमाचार्य-वर्याश्चाल्पमपि कृत्यमिदं यथाशक्ति सश्रद्धं स्वसविधे आक्षरादाम्नह्यविद्यमधीत वद्भिरात्मीयै रस्माभिः फलपर्यन्तं सम्पादितमिति नूनं सन्तुष्येयुः। वयमप्यनया सेवया धन्याः स्मः।

ग्रन्थस्यास्य प्रकाशनाय स्वीकृतिं प्रदत्तवद्भ्यो सं० सं० वि० वि० कुलपति पदमलं कुर्वद्भ्यो विद्वद्वरेभ्यो डा० देवस्वरूपमिश्र महोदयेभ्यो धन्यवादास्समर्प्यन्ते।

अस्य ग्रन्थस्य संपादनकार्येऽस्माकमभिरुचिं प्रकाशनव्यवस्थां च विहितवद्भ्यः

प्रकाशनसमितिसदस्येभ्यो सं० सं० वि० वि० अनुसन्धानसंस्थाननिदेशकेभ्यो डा० वागीश शास्त्रिमहोदयेभ्यश्च कृतज्ञतामाविष्करोमि ।

शीघ्रमेव ग्रन्थस्यास्य प्रकाशनानुकूलसामग्रीसंपादनमुखेन प्रकाशनकार्यं आत्मीयत्वेन विभाव्य सुष्वु निर्व्यूढद्रुयः प्रकाशानाधिकारिभ्यो डा० हरिश्चन्द्रमणि महाभागेभ्यश्च कार्तज्ञ्यं निवेद्यते ।

श्रीनिवासेन दासेन गुर्वादेशानुसारिणा ।
यज्ञोपवीततत्त्वस्य सारोऽलेखि सतां मुदे ॥

इति

श्रीदेवनाथतातयार्यपदपङ्कजपरागपरमाणुः
ना० रा० श्रीनिवासः
उपाचार्यः (रीडर)
धर्मशास्त्र मीमांसाविभागे
काशी हिन्दू विश्वविद्यालयस्य
वाराणस्याम्

# विषयसूचिका


पृ० सं०

उपासने गुरूणामित्यस्य मुख्योपवीतपरत्वम् । २

पूर्वपक्षिणा ब्रह्मचारिणो वस्त्रोपवीतविधिपरतयोदाहृतप्रमाणानामन्यपरत्व प्रतिपादनम् । ५

नित्यमुत्तरं वासः कार्यमित्यस्योत्तरवासस्सामान्यविधिपरत्वं, अपि वेति सूत्रस्य 'उपासने गुरूणामितिसूत्रनुकल्पपरत्वं च । ८

उत्तरं वासः कार्यमित्यस्य द्वितीयवासोमात्रपरत्वम् । १०

उत्तरीयं योगपट्टमित्यस्यानापस्तम्बिपरत्वनिराकरणम् । ११

उपासने दैशिकानामित्यापस्तम्बस्मृतेरप्रसिद्धिः, प्रसिद्धावपि उपासन इति तदीयसूत्रसमानार्थता, द्वितीयवस्त्रावश्यकतामात्रपरत्वं वा । १२

सव्यादंसात्परिभ्रष्ट इति वचनार्थनिरूपणम् । १४

यतीनां वस्त्रयज्ञोपवीतनिराकरणम् । १८

ब्रह्मचारियत्यो रुत्तरीयस्य पुरुषार्थतानिराकरणम् । २१

प्रचेतो व्यास शाट्यायनिवचनादीनां द्वितीयवासोमात्रावश्यकतापरत्वम् । २१

देवागार इत्यादि मनुव्यासवचनानां मुख्ययज्ञोपवीतपरत्वम् । २१

विखनस्सूत्रभाष्यार्चनानवनीतादिषु उत्तरीयपदस्य विन्यासविशेषतात्पर्य-निराकरणम् । २२

'यज्ञोपवीतं कृत्वाऽधोनिपपात' इत्यस्य मुख्ययज्ञोपवीतपरता, यज्ञोपवीतपदस्य बस्त्रे रूढिनिराकरणं च । २२

श्रीविष्णुतत्वस्य प्रतिनियतविषयत्वं, अनेकप्रामाणानुगुण्येन द्वितीयवस्त्रमात्र-परत्वं वा । पाद्मशंखादिवचनानामविरोधप्रतिपादनं च । २४

प्रौढपादो बहिः कक्ष इति वचनार्थनिर्वचनम् । २६

चन्द्रिकानिर्वाहः । २७

दशाहृतर्पण प्रकरणस्थस्मृतिरत्नवचनविवेचनम् २७

नयमयूखमालिका, दीपिका, कौस्तुभाद्यानुगुण्यम् । २८

भोजनकाले मुख्योपवीतस्यैव देवलादिवचनेषु विधानप्रतिपादकहेमाद्रि देशिक-चरणाद्यभिप्रायनिरूपणम् । २९

पाद्यसंहिताग्रास्समुच्चयपरत्वाभाव निरूपणम् । ३०

जातुकर्णिदेवलहारीतादिवचनार्थं निर्वचनम् । ३१

गृहस्थानामुपवीत द्वयमेव नित्यं, नयमयूखमालिका टुप्टीकादिनिर्वाहः । ३१

प्रकरणानुगुण्येन शिष्टाचाराच्च वन्दन इत्यादि निषिद्धकालत्तरकालेऽनियमे-नोर्ध्ववस्त्रधारणप्रतिपादनमुखेन निगमनम् । ३४

अय्या श्रीनृसिंहतातार्यमहादेशिकविरचितो

# यज्ञोपवीत-तत्त्वविमर्शः

श्रीदेवनाथ परब्रह्मणे नमः

श्रीमते लक्ष्मीहयवदन परब्रह्मणे नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमते वेदान्तरामानुजमहादेशिकाय नमः

**लक्ष्मीहयास्य पदपङ्कजयुग्मसेवा निर्धूतकल्मषमनाः कृतिभिर्नियुक्तः ।**
**श्रीशैलवंश्य नरसिंहसुधीर्विधत्ते गौणोपवीतविषये रुचिरं प्रबन्धम् ॥**

**मुख्ययज्ञोपवीतोर्ध्वं वासः परगिरामिह ।**
**गौणोपवीततात्पर्यवर्णनं निरसिष्यते ।**

अत्र केचन उपनयनप्रभृति सर्वैरपि द्वितीयं वाससव्यस्यांसस्योपरिष्टाद्ग्रीवां हृदयमालम्व्य पृष्ठञ्च परिगृह्येत्यादिसन्निवेशविशिष्टं कर्मार्थतया कर्मकाले पुरुषार्थतया सदा च धार्यमित्यभिप्रयन्तस्तत्प्रमाणतया कानिचिदापस्तम्बसूत्राणि तद्व्याख्यातृवचनानि प्रकीर्णानि स्मृत्यादिवचनानि चोदाजह्रुः । उदाहृतानि च तानि सर्वाण्यन्यपराण्येव । तत्र प्रथमत एतद्विषये प्रमाणमूर्धन्यतयाऽभिप्रेतानि वचनानि विचार्यन्ते ।

तथाहि—आपस्तम्बधर्मसूत्रे[1] ब्रह्मचारि प्रकरणे[2] **उपासने गुरूणां वृद्धानामतिथीनां होमे जप्यकर्मणि भोजने आचमने स्वाध्याये च यज्ञोपवीती स्यात्** (१-१५-१) इति सूत्रम् । उपासनं प्रणिपातपरिप्रश्नसेवादीति गीताभाष्ये स्पष्टम् । यज्ञोपवीतं वासोविन्यासविशेष इत्युज्ज्वलायामुक्तमिति ब्रह्मचारिणोऽपि ते गौणोपवीतसिद्धिं वर्णयामासुः ।

---

१. आ·ध-सू-व्या-१-५-१५-१

२. टि० मुख्ययज्ञोपवीतं चोर्ध्ववासश्च मुख्ययज्ञोपवीतोर्ध्ववाससी तत्पराः या गिर स्तासामिति विग्रहः । 'उपासने गुरूणा' मितिसूत्रव्याख्यायामुज्ज्वलायां यज्ञोपवीतं वासो विन्यासविशेष इति वचनं वस्तुतो मुख्ययज्ञोपवीतपरं, एवं नित्यमुत्तरं वासः कार्यमिति आपस्तम्बसूत्रं ऊर्ध्ववासः परमेव । एवं सति एतादृशवचनानां गौणोपवीतपरत्वं वर्णयन्ति पूर्वपक्षिणः । तन्मतं निरसिष्यते अनेन ग्रन्थेन ।

## अनेक श्रुति स्मृति ग्रन्थपर्यालोचनेन 'उपासने गुरूणामिति सूत्रस्य मुख्योपवीतपरत्व निरूपणम्

तदापातमधुरम् । उदाहृतञ्च सूत्रं न ब्रह्मचार्यसाधारणम् । "तस्य सर्वेषामेव कर्मणां शेष भूतमाचमनं विधास्यन् तदुपयोगिनो विधीनाह" इत्यवतारि तत्वेन वक्ष्यमाणाचमनशेषतया सर्वसाधारण्यावगमात्, "**अजिनं त्वेवोत्तरं धारयेत्** (१-३-१० आ·ध) इति सूत्रेणाथ स्वपक्षमाहेत्यवतारितेन द्वितीयवस्त्रस्यैव ब्रह्मचारिणो निषिद्धत्वेन गृहस्थतादिपरतयैव नेतव्यत्वात् ।

किञ्च तत्सूत्रं न भवदभिमतपरं—आपस्तम्बगृह्यसूत्रदशमखण्डस्थस्य **"ब्राह्मणान् भोजयित्वाऽऽशिषो वाचयित्वा कुमारं भोजयित्वा"** (४-१०-३)[१] इत्यादिसूत्रस्योपनयनेतिकर्तव्यताप्रतिपादकस्य व्याख्यानावसरे 'अत्र च कुमारस्य स्वभोजनात्प्राक् **"यज्ञोपवीतं परमं पवित्रं'** इति मन्त्रेण यज्ञोपवीत धारणम् । भोजन आचमने स्वाध्याये च यज्ञोपवीती स्यादिति धर्मशास्त्रवचनादिति तात्पर्यदर्शनोक्त्या मुख्ययज्ञोपवीतप्रकरणे

"किञ्च गुरूणामुपासन इत्याद्युक्तकाल एवोपवीतं धार्यमिति न भ्रमितव्यं, सदेत्युक्तेः,[२]

**विना यच्छिखया कर्म विनायज्ञोपवीतकम् ।**
**राक्षसं तत्कृतं सर्वं नित्यं तद्धारयेत् द्वयम् ॥**

इति व्यासस्मरणादिति" कण्ठभूषणोक्त्या उपनयनप्रकरणे यज्ञोपवीतप्रमाणतन्निर्माणादिकथनावसरे— आपस्तम्बः 'उपासने गुरूणां **वृद्धानामातिथीनांहोमे जप्यकर्मणि भोजन आचमने स्वाध्याये च यज्ञोपवीती स्यादिति**—एतेषु कर्मसु यज्ञोपवीतविधानात् कालान्तरे नावश्यंभाव इति केचिद्व्याचक्षते ।

**कायस्थमेव तत्कार्यमुत्थाप्यं न कदाचन ।**
**सदोपवीतिना भाव्यं सदा बद्धशिखेन च ॥**

इत्यादि बहुस्मृतिविरोधात् शिष्टाचारविरोधाच्च तदनादरणीयमित्यन्य इति[३] स्मृतिमुक्ताफलोक्त्या च तत्सूत्रस्य मुख्ययज्ञोपवीतपरत्वावसायात् ।

न च वासोविन्यासविशेषो यज्ञोपवीतमित्युज्ज्वलापङ्क्तेरसङ्गतिः । "यज्ञोपवीतं कुरुते सूत्रं वस्त्रं कुशं च वा"[४] इतिगोभिल स्मृत्या **"वाससायज्ञोपवीतार्थान्**

---

१. आ. गृ-व्या. ४-१०-५
२. क-भू-पृ-२३८
३. स्मृ० पु० पृ० २९८१
४. स्मृ० मु० पृ० २९६१

**कुर्यात्तदभावे त्रिवृता सूत्रेणवेति"**[1] ऋश्यशृङ्गस्मरणेन **"वस्त्रं यज्ञोपवीतार्थे त्रिवृत्सूत्रं च कर्मसु"**[2] इति स्मृतिरत्नवचनेन चोपबृंहिततया **"अजिनं वासो वा दक्षिणत उपवीय"**[3] (तै. आर. २-१) इति श्रुत्या वस्त्रस्यापि विकल्पेन यज्ञोपवीतत्वधर्मित्वावगत्या वैकल्पिकेषु च तेषु वासस एव मुख्यत्वस्य ऋश्यशृङ्गाभिमतत्वात्तदभिप्रायकमिदं सूत्रमित्यभिप्रेत्य तथा व्याख्यातत्वात्। एवमभिप्रायवर्णन एवोज्ज्वलापङ्क्तिकराञ्जस्यं भवति।[4] "तत्र वासोविन्यासविशेषो यज्ञोपवीतमिति व्याख्याय "दक्षिणं बाहुमुद्धरतेऽवधत्ते सव्यमिति यज्ञोपवीतमिति" **ब्राह्मणं** वाससोऽसंभवेऽनुकल्पं वक्ष्यति,—अपि वा सूत्रमेवोपवीतार्थ इति। मनुरप्याह—**'कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं त्रिवृत्'** इति। उद्धृत्य दक्षिणे पाणावुपवीतीत्युच्यते द्विज इति चाभिहितम्।

**'दक्षिणं बाहुमुद्धरतेऽवधत्ते'** इति श्रुते र्मुख्ययज्ञोपवीतपरतया देशिकचरणै र्वैदिकसार्वभौमैरन्यैश्च कैश्चिन्मीमांशकैस्स्वस्वकीयग्रन्थेषूपात्तायाः ब्राह्मणत्वोक्त्या वाससोऽसंभवे अनुकल्पतया सूत्रितस्य त्रिवृत्सूत्रस्य संवादकत्वेन **'कार्पासमुपवीतं स्याद्विप्रस्योर्द्धवृतं त्रिवृ'**दित्युपनयनप्रकरणोपात्तमनुवचनप्रदर्शनेन चास्य मुख्ययज्ञोपवीतत्व प्रतीतेः। वाससा यज्ञोपवीतार्थान् कुर्यात्तदभावे त्रिवृता सूत्रेणवेति ऋश्यशृङ्गस्मृत्या वाससोऽसंभवे वैकल्पिकस्य त्रिवृत्सूत्रस्योपवीतार्थत्ववत् **"अपि वा सूत्रमेव"** इत्यादिसूत्रेण सूत्रस्योपवीतत्वं सिद्धयतीति वाससोऽसंभवेऽनुकल्पं वक्ष्यतीत्यवोचत्। ऋश्यशृङ्गवचनरीत्याऽनुकल्पतयाऽवगतस्य सूत्रस्य न वास एवेति ?वासो व्यवच्छेदकतया व्याख्यातैवकारबलात् मुख्यत्वेनापस्तम्बाभिमतत्वं व्यज्यत इत्यर्थप्रतीतेश्च

१. "न चोक्तोपवीतालाभेऽपि देवलः—

**"कार्पास क्षौम गोवाल शणवल्कतृणोद्भवम्।**
**सदा संभवता धार्यमुपवीतं द्विजातिभिः।"** इति

तृणोद्भवं कुशनिर्मितम्। तथा च **गोभिलः—यज्ञोपवीतं कुरुते सूत्रं वस्त्रं कुशं च वेति।** सूत्रमपि वस्त्राभावे वेदितव्यम्। वाससा यज्ञोपवीतार्थान् कुर्यात्, "तदभावे त्रिवृता सूत्रेण वेति" **ऋश्यशृङ्गस्मरणादित्यादिमुक्ताफलादिग्रन्थसन्दर्भात्त्रिवृद्यज्ञोपवीताभावे वाससस्तदभावे केवलसूत्रमेव धार्यमिति** ऋश्यशृङ्गाशयप्रतीतिरित्युक्तं युक्तम्।

---

१. स्मृ० मु० पृ० २९६१
२. स्मृ० मु० पृ० २९६१
३. तै. आ. २.११
४. आ. ध. व्या-१-५-१५-१-पृ० १०६१
५. स्मृ. मु. पृ. २१६

**"कार्पासमुपवीतं[1] स्याद्विप्रस्योर्ध्ववृतं त्रिवृत्। शणसूत्रमयं राज्ञो वैश्यस्याविक-सूत्रक'**मिति मनुवचनोपन्यासपूर्वकं माधवीयादावुपवीतमभिधाय तदलाभे यथासंभवं गोवालादिकं ग्राह्यं देवलादिभि विकल्पेन यज्ञोपवीतत्वधर्मितयाऽनेकेषां प्रतिपादनादित्यभिप्रेत्य देवलादिवचनान्युपात्तानि। तत्र **'कार्पासक्षौम गोवाले**त्यादिकं देवलवचनं तत्र माधवीये "कार्पासक्षौमे ब्राह्मणराजन्यभेदेन **'कार्पासमुपवीतं स्याद्ब्राह्मणस्य कौशेयं राजन्यस्येत्यादि पैठीनसिवचने**नोपवीते इत्युक्त्वा उक्तोपवीताभावे यथासंभवं गोवालादिकं ग्राह्यं—**तथाऽऽह गोभिलः—कार्पासक्षौमगोवाले**त्यादिकमवतारितं न हि तद्वचने वचनान्तरे वोक्तोपवीतालाभ इत्युक्तम्। तत्र देवलवचनेन कार्पासादिसाधारण्येन विकल्पेनोपवीतत्वं प्रतीयते। गोभिलवचनेन च सूत्रवस्त्रकुशरज्जूनामुपवीते वैकल्पिकत्वमवगम्यते। तत्र वाससा यज्ञोपवीतार्थान् कुर्यात्तदभावे त्रिवृता सूत्रेणेति ऋश्यशृङ्गवचने वस्त्रस्य वैकल्पिकत्वेऽपि मुख्यत्वमभिहितमिति यज्ञोपवीतविषयेऽनेकेषां धर्मित्वात् मन्वाद्यभिमत-त्रिवृत्सूत्राभावे वैकल्पिकेषु यस्य कस्यचिदुपादानमित्येतद्ग्रन्थाशयः। मुक्ताफले[2] चोक्तोपवीतालाभेऽपि "देवल"इत्यादिना देवलगोभिलऋश्यशृङ्गवचनान्युदाहृत्य "अपि वा सूत्रमेवोपवीतार्थं[3]" इत्यापस्तम्ब सूत्रमप्युपात्तम्। तत्सूत्रव्याख्यानावसरे चोज्ज्वलायां कार्पासमुपवीतं स्यादिति मनुवचनस्यैव संवादतयोपादानात्, तद्वचनमुदाहृत्य तच्च नवतन्तुकं ग्राह्यमिति माधवादिभिरभिधानाच्च 'अपि वा सूत्रमेवेति सूत्रसच्छायं ऋश्यशृङ्गवचनगत "सूत्रपदं नवतन्तुक-त्रिग्रन्थियुक्त-त्रिसूत्रपरमेव स्पष्टं प्रतीयत इति।

"कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं त्रिवृदि"ति मनुस्मृत्यादिषु त्रिवृत्सूत्रस्यैव प्रतिपादनात् **'नव वै त्रिवृत्'** इति श्रुतेश्च कार्पासादिसूत्रपक्षमेव सर्वे निबन्धनकारा उररीचक्रुः। एतच्च **'अजिनं वासो वा दक्षिणत उपवीय'**[4] इति वासोविन्यासविशेषस्योपवीतत्वं यद्यपि श्रूयते, तथापि नव वै त्रिवृदिति त्रिवृत्सूत्रस्योपवीतत्वश्रवणात् आचाराच्च [5]सूत्रमेव धार्यं तथा मनुः—कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतंत्रिवृदितीत्यादिकण्ठभूषण-वाक्यसिद्धम्।

अत एवोपवीतादिपदस्य विन्यासविशेषाच्छन्न-द्रव्यसामान्यवाचित्वेऽपि[4] "उपवीतं ब्रह्मसूत्रं सूत्रं यज्ञोपवीतकम्। यज्ञसूत्रं देवलक्ष्म इत्याख्याषट्कमेण त्वि"त्यादिना त्रिवृत्सूत्रासाधारण्यं पार्थदाशरथ्यादिशब्दवदुपपद्यते।

१. म० स्मृ० २.४४।
२. स्मृ० मु० पृ० २१६.
३. आ० ध० १-२.४.२२.
४. क-भू·पृ० २२१
५. क-भू. पृ० २३३

एवं च **"अपि वा सूत्रमुपवीतार्थे"** इत्यनेन सूत्रेण विन्यास-विशेषविशिष्टस्य त्रिवृत्सूत्रस्योपासने गुरूणामित्युक्तकालिकत्वावगत्या कंण्ठभूषणादिषु कालान्तरेऽनावश्यकत्वशंकानिराकरणोपपत्तिः। तस्मादस्य सूत्रस्य गौणोपवीतपरत्वं दुर्भणमेव। एतेन **"अथ कर्माण्याचाराद्यानि गृह्यन्त उदगयनपूर्वपक्षाहः पुण्याहेषु कार्याणि यज्ञोपवीतिना प्रदक्षिणं पुरस्तादुदग्वोपक्रमः, तथापवर्गः, अपरपक्षेपित्र्याणि प्राचीनावीतिना"**। इदं तु वासोविन्यासभेदविधानं, स्वतन्त्रास्वतन्त्रसर्वपित्र्यर्थमित्यादिना गृह्यसूत्रव्याख्यानवचनेन गौणोपवीतस्य सर्वगृह्यकर्माङ्गत्ववर्णनमप्येतत्सोदरमित्यवधार्यते। मुख्यार्थत्यागे प्रमाणाभावात्।

## आपस्तम्ब-गृह्य सूत्रव्याख्यानगत-वासोविन्यासभेद विधानमित्यस्यापि मुख्योपवीतपरत्वस्थापनम्।

प्राचीनावीतिनेति सूत्रव्याख्यानावसरे इदं च वासो विन्यासभेदविधानमिति तात्पर्यदर्शनोक्त्या गौणोपवीतपरत्वप्रतिपादनं तु साहसमेव। ऋश्यशृङ्गमतरीत्योपासने गुरूणामिति सूत्राभिप्रेतस्य मुख्ययज्ञोपवीतस्य विन्यासविशेषविशिष्ट-वाससः पित्र्ये विन्यासभेदविधानतात्पर्यकत्वोपपत्तेः।

किञ्च यज्ञोपवीतिनेत्यत्र तात्पर्यदर्शने[३] "ननु यज्ञोपवीतं पाकयज्ञेषु प्रागपवर्गाणीत्यादिना सिद्धम्। विवाहादिहोमेषु जपादिषु च होमे जप्यकर्मणीत्यादिना, अतोऽत्रैतद्विधिर्व्यर्थः—

सत्यम्। यत्राप्राप्तिर्हेमन्तप्रत्यवरोहणादिषु तत्रायं 'विधिस्सार्थ एवे'त्यनेन वाक्येन मुख्ययज्ञोपवीतपरतया निर्णीतेन 'प्रागपवर्गाणि' इत्यादिपरिभाषासूत्रेण उपासने गुरूणामित्यादिना च चारितार्थ्यमाशङ्क्य सत्यमित्यनेन तदभ्युपगम्य हेमन्तप्रत्यवरोहणादिषु विधिसार्थक्योपपादनादप्ययमर्थ स्सुग्रह एव

## पूर्वपक्षिणा ब्रह्मचारिणो वस्त्रोपवीतविधिपरतयोदाहृतप्रमाणवचनानामन्यपरत्वप्रतिपादनम्

यदपि व्यासः

कृतोपनयनो वेदानधीयीत द्विजोत्तमः

**वसेदविकृतं वासः कार्पासमकषायकम्।**
**तदेव परिधानार्थं शुक्लमच्छिद्रमुत्तमम्॥**

---

१. आ० गृ० १-1-१ तः अपन्तम्। १ पृ० १-७
२. आ० गृ० व्या० ता० पृ० १०
३. आ० गृ० व्या० ता० पृ० ६

अत्रपूर्वार्धमन्तरीयपरं, उत्तरार्धमुत्तरीयपरम्। परिधीयत इति परिधानं **"वाससी परिधायेति बोधायनसूत्रेण अहतमुत्तरं वासःपरिधत्ते"** इत्यापस्तम्बसूत्रेण च परिधानकर्मत्वस्योत्तरीयेऽपि सिद्धत्वात्परिधानशब्दवाच्यत्वं तस्य सिद्धम्।

**मनुः--द्वितयं स्नातकानां स्यादन्तर्वासस्तथोत्तरम्"** इति उत्तरमित्यस्योत्तरीयमित्यर्थः। **"ऐणेयमजिनमुत्तरीयं"** इति पारस्करप्रयुक्तोत्तरीयपदस्थाने **"अजिनं त्वेवोत्तरं धारयेत्"** इत्यापस्तम्बेनोत्तरपदस्य प्रयुक्तत्वेन तयोरेकार्थत्वावधारणात्। यथा यज्ञोपवीतपदस्य "सव्यस्यांसस्योपरिष्टाद् ग्रीवां हृदयं पृष्ठं च परिगृह्य दक्षिणस्य हस्तस्याधस्तादुपवीतं भवती"ति बोधायनोक्तविन्यासविशेष-विशिष्ट-सूत्रादौ शक्तिः, तथोत्तरोत्तरीयपदयोरप्युक्तविन्यासविशेषविशिष्टद्वितीयवस्त्रे शक्तिः। यथा **"यज्ञोपवीतं कृत्वाऽधो निपपात"** इत्यादौ विशेष्य "भूतं वास उद्दिश्य विशेषणीभूतविन्यासविशेषो विधीयते, तथात्रापि विशेष्यभूतं वास उद्दिश्य विशेषणीभूतविन्यासविशेषो विधीयते, अतो नाभेरुपरि कट्युदरकण्ठदक्षिणांसशिरोदेशे सव्यांसमात्रे वा द्वितीयवस्त्रधारणेऽन्तरीयैकदेशस्योपवीतवद्धारणे वा नैतच्छास्त्रार्थः कृतो भवतीति ध्येयमित्यन्तेन ब्रह्मचारिस्नातकयो र्गौणोपवीतवर्णनं तदप्यलग्नकम्।

**कृतोपनयनो** वेदानिति व्यासवचने च तदेवेति तच्छब्देन पूर्वार्धोक्तमन्तरीयं परामृश्य परिधानरूपद्वितीयवस्त्रकार्ये तस्यैव विधानेन द्वितीयवस्त्रनिषेधस्यैव ब्रह्मचारिणः प्रतीयमानत्वात्। न च तच्छब्दस्य पूर्वोक्तव्यक्तिपरत्वे संभवति जात्यालम्बनत्वं कल्पयितुं युक्तम्। येन तज्जातीयमन्यद्विवक्षितं स्यात्। अतोऽर्धद्विकेनान्तर्वस्त्रधारणविधि र्बहिर्वस्त्रनिषेधश्च सिद्धः। अत एव **"विशेषस्तु समाख्यातो वासः कृष्णाजिनं परमिति"** गृहस्थादिविलक्षणं कृष्णाजिनमेवोपरिवासस्स्थनीयतया विधीयते।

**कार्ष्ण-रौरवबस्तानि चर्माणि ब्रह्मचारिणः।**
**वसीरन्नानुपूर्व्येण शाणक्षौमाविकानि च॥**
**ब्राह्मणस्याजिनं कार्ष्णं रौरवं क्षत्रियस्य तु।**
**बस्ताजिनं तु वैश्यस्य सर्वेषां वाऽजिनं स्मृतम्॥**

**कृष्णरुरुबस्ताजिनान्युत्तरीयाणि कृष्णाजिनमुत्तरीयं ब्राह्मणस्य रौरवं राजन्यस्य बस्ताजिनं वैश्यस्य कृष्णरुरु बस्ताजिनानीत्यादि, मनुबृहस्पति। शङ्खवसिष्ठ पारस्कर गौतमादिस्मृत्यैकार्थ्यात्॥**

---

१. म० स्मृ० २. ४२

२. गौ ध० सू० १८

अस्तु वैतद्वचनं भवदभिमतार्थकं अथापि ब्रह्मचारिणो द्वितीयवस्त्रमापस्तम्बानभिमतमित्यस्यावेदितत्वेन तस्य वैरवानसगृह्योक्तरीत्या तन्मात्रविषयत्वसंभवेन सांमान्यतो ब्रह्मचारि विषयत्वकथनस्यायुक्तत्वात्, तत्रापि विन्यासविशेषासिद्धेश्च ।

यज्ञोपवीतपदस्य निरुक्तबोधायननिरुक्तिबलादुद्धृते दक्षिणे पाणावुपवीत्युच्यते द्विजः निवीतस्य मध्ये दक्षिणे पाणावुद्धृते यस्संनिवेशविशेष स्तदुपवीतं नाम-तदस्यास्तीत्युपवीतीत्यर्थः ।

**"उद्धृत्य दक्षिणं बाहुं सव्यांसे तु समर्पितम् ।**
**उपवीतं भवेन्नित्यम्"**
**"कण्ठे तु सव्ये निक्षिप्तमुपवीतमुदाहृतम्"**

इत्यादि मनु-व्यास-कात्यायन-वचनैः,

**"उपवीतं यज्ञसूत्रं प्रोद्धृते दक्षिणे करे"** इत्यमरकोशात् एतदुपबृंहितया **"दक्षिणं बाहु मुद्धरतेऽवधत्ते सव्यमिति यज्ञोपवीतमिति श्रुत्या च** विशिष्टे शक्तिसिद्धावपि एतादृशनिरुक्त्याद्यभावेऽपि विशिष्टे शक्तिनिर्णयस्य शपथैकसाध्यत्वात् । प्रत्युत—

**'नोत्तरीयमधः कुर्यान्नोपर्याधस्त्यमम्बरम् ।'**
**अन्तर्वासस्तथोत्तरम् ।**
**अन्तरीयं विना वापि उत्तरीयं विना यथा ।**
**द्वितयं स्नातकानां स्यात् अन्तर्वासस्तथोत्तरम् ॥**

इत्यादिष्वधोवासः प्रतिकोटित्वेनोपरिवासोमात्रे प्रसिद्धेः ।

**द्वौ प्रावारोत्तरासंगौ समौ बृहतिका तथा । संव्यानमुत्तरीयं च"** इत्यमरकोशात् "उत्तरे ऊर्द्ध्वभागे आसज्यते । षञ् सङ्गे खञ् । उत्तरस्मिन् देहभागे भवं—गहादित्वाच्छः । पञ्चोपरिवस्त्रस्ये"त्यमरसुधापङ्क्त्युपष्टम्भाच्च उपरिवासोमात्रवाचकत्वसिद्धेश्च विशेष्यभूतवासस एवाप्राप्त्या श्रुतिदृष्टान्तीकरणमात्रेण विशेषणसिद्धयायोगाच्च तच्छ्रुतेरतदर्थत्वस्य स्थापयिष्यमाणत्वाच्च ।

**यत्तु आपस्तम्बः—"अथ गृहमेधिनो व्रतम्" इत्युपक्रम्य "नित्यमुत्तरं वासः कार्यमिति"** । उत्तरमुपवीतमित्यर्थः । एतदनन्तरसूत्रे **"अपि वा सूत्रमेवोपवीतार्थे"** इत्यत्रानुकल्पस्योपवीतार्थे विहितत्वेन मुख्यकल्पस्य वाससोऽपि तत्रैव विधातव्यत्वात् । **"वस्त्रं यज्ञोपवीतार्थे सूत्रं वा त्रिगुणीकृतमि"ति** स्मृत्यन्तरैकार्थ्याच्चेति तदपि चिन्त्यम् । सूत्रस्थोत्तरपदस्य मुख्यार्थत्यागे प्रमाणाभावात्, लक्ष्यार्थपरत्वस्य व्याख्यातृनिबन्धनकाराद्यनङ्गीकृतस्य सूत्रस्थपदे अद्यतनैरधिरोपणस्य हास्यत्वात् ।

## नित्यमुत्तरंवासः कार्यमित्यस्योत्तरवाससस्सामान्यविधानपरत्वमपि वेति सूत्रस्योपासने गुरूणामिति सूत्रानुकल्पपरत्वं च

एतदनन्तरसूत्रेऽनुकल्पस्य सूत्रस्योपवीतार्थे विधानात् मुख्यकल्पस्य वाससोऽपि तत्रैव विधातव्यत्वादित्यनेन हेतुप्रदर्शनं च पूर्वापरसूत्रतद्व्याख्यानसन्दर्भापरिचयविलसितम्। उज्ज्वलायामुपासने गुरूणामिति सूत्रव्याख्यानावसरे वाससोऽसंभवेऽनुकल्पं वक्ष्यति अपि वा सूत्रमेवोपवीतार्थं इति। मनुरप्याह—कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं त्रिवृदित्यभिधानेन मुख्ययज्ञोपवीतधर्मिणो वाससोऽसंभवे सूत्रस्यानुकल्पतापरत्वेन 'अपि वेत्यादि सूत्रप्रवृत्ते व्यक्तत्वेन विन्यासविशेषविशिष्टस्य वाससो मुख्ययज्ञोपवीतस्य ऋश्यशृङ्गमतेनानुकल्पभूतं स्वाभिप्रेतं सूत्रं मुख्ययज्ञोपवीतमेव अपि वेत्यादि सूत्रप्रतिपाद्यं, नित्यमुत्तरं वासः कार्यमिति तु द्वितीयवासोमात्रविधायक-मित्यवगम्यते।

**उपासने**[1] **गुरूणामित्यादिना** केषुचित्कालेषु यज्ञोपवीतं विहितम्। इह प्रकरणात् "गृहस्थस्य नित्यमुत्तरं वासो धार्य"मित्युच्यत इति[2]। "अपि वा सूत्रमेवोपवीतार्थे" अपि वा सूत्रमेव सर्वेषामुपवीतकृत्ये भवति' न वास एव। तत्र मनुः। कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं त्रिवृत् इति। **बोधायनस्तु कौशं सूत्रं वा त्रिस्त्रिवृद्यज्ञोपवीतमिति च तदुज्ज्वला**। तस्याश्चायमर्थः। ननु "नित्यमुत्तरं वासः कार्य" मित्यनेनोपरिवस्त्रविधानं विफलम्। "उपासने गुरूणा"मित्यादिना मुख्ययज्ञोपवीतविधानादेव तद्धर्मितयोपरिवासः प्राप्तेरित्याशङ्क्य केषुचित्कालेषु यज्ञोपवीतविधानात् तत्तत्कालेषु तद्धर्मितयोपरिवासःप्राप्तावपि 'अथ गृहमेधिना व्रतम्' इति प्रक्रमात् प्रकरणात् गृहस्थस्य नित्यं द्वितीयवासो विधानमित्युपासने गुरूणामित्युक्तकाल भिन्नकालेष्वपि गृहस्थस्य द्वितीयवासोधारणं सूत्रफलमिति परिहृतम्।

वस्तुतस्तु ऋश्यशृङ्गमतरीत्याऽनुकल्पभूतवैकल्पिकसूत्रयज्ञोपवीतपक्षमेवाश्रयामः। एवं चोत्तरवाससः कदाचिदप्यप्राप्त्या एतत्सूत्रमसङ्कुचितमेव गृहस्थस्य द्वितीयवासो विधायकमित्यभिप्रेत्य 'अपि वेत'यादि सूत्रं कृतमिति। व्याख्यास्वरससिद्धिश्चायम्। उपासने गुरूणामित्यादि सूत्रं सर्वेषां मुख्ययज्ञोपवीतविधायकं अपि वा सूत्रमेव सर्वेषामुपवीतकृत्ये भवतीत्यनेन तदनुकल्पता प्रतीयते। एवकारेण न वास एवेति व्याख्यातेनैतत्कल्पस्य स्वाभिमतत्वम्। **तत्र मनुः "कार्पासमुपवीतं स्याद्विप्रस्योर्ध्ववृतं त्रिवृदिति। बोधायनस्तु कौशं सूत्रं वा त्रिस्त्रिवृद्यज्ञोपवीतमितीत्यनेनास्य** पक्षस्य मन्वाद्यभिमतता च प्रतीयत इति।

---

१. आ० ध० सू० २. २० ४० २२।

२. ,, ,, ,, ,, ,, २३।

एवं च "नित्यमुत्तरं वासः कार्य"मिति विहितद्वितीयवासोऽनुकल्पपरत्वं अपिवेत्यादिसूत्रस्य न युक्तिमत्। यदि नित्यमुत्तरं वासः इत्यत्र विन्यासविशेषविशिष्ट-वस्त्रविधानमभिप्रेतं स्यात् तदोपासने गुरूणामित्यादाविव नित्यं यज्ञोपवीती स्यादित्येव सूत्रशैली स्यात्।

व्याख्यात्रा विन्यासविशेषविशिष्टं वास उत्तरं वास इति वक्तव्यम्। न च तथा दृश्यते। प्रत्युतोपासने गुरूणामित्यादिना केषुचित्कालेषु यज्ञोपवीतं विहितम्। अत्र तु प्रकरणात् गृहस्थस्य नित्यमुत्तरं वासो धार्यमित्युच्यत इति भेदेनैव व्याख्यातम्। अभेदे च प्रकरणात् गृहस्थस्य नित्यं यज्ञोपवीतं धार्यमित्युच्यत इत्येव व्याख्यातव्यम्।

अपि वेत्यादिसूत्रस्य पूर्वसूत्रविहितोत्तरवासोऽनुकल्पपरत्वे अपि वा सूत्रमित्येवालम्। तावतैव तदर्थत्वलाभात् उपवीतार्थं इत्यप्यसङ्गतम्। सूत्रमेव तदर्थइत्येतावतैवाव्यवहितसूत्रोक्तोत्तरीयपरामर्शसंभवात्। नित्यमुत्तरमिति विहितस्य गृहस्थासाधारणतया तदनुकल्पविधायकत्वे तस्यापि तदसाधारण्यापत्त्या अपि वा सूत्रमेव सर्वेषामुपवीतकृत्ये भवतीति व्याख्यानमसङ्गतमेव स्यात्।

न च सर्वेषामित्यस्य सर्वकर्मणामित्यर्थपरता सर्वकालपरता वा शक्यशङ्का। पूर्वोक्तस्य सर्वकर्मार्थतापतिपत्तौ हि अनुकल्पस्य सर्वकर्मार्थतयाऽभिधानं भवेत्। कालपरत्वे च केषुचित्कालेष्वितिवत् सर्वेषु कालेष्वित्यभिधातव्यम्। नित्यमित्यनेन द्विरुक्तता चेति बहुतरासामञ्जस्य प्रसङ्गात्।

अस्मत्पक्षे चापिवेत्यादिमात्रात् व्यवहितसूत्रस्थ वासोयज्ञोपवीतकार्यकरत्वा-लाभादुपवीतार्थ इत्यस्याञ्जस्यं, प्रकरणाद् गृहस्थस्य सर्वेषामित्यादीनामधिकारिपरत्वे-नैकरूप्यं मुख्यकल्पस्य सर्वसाधारण्यात् सर्वेषामित्यस्याबाधितार्थकता चोपपद्यते।

किञ्च पूर्वसूत्रप्रतिपन्नोत्तरीयानुकल्पपरत्वे तत्संवादतया **'तृतीयमुत्तरीयार्थ'** इत्यादिदेवलवचनमेवोदाहर्तव्यम्। न च तथोदाहृतम्। किन्तु स्थलद्वयेऽपि मुख्य-यज्ञोपवीतपरं कापसिमुपवीतं स्यादित्यादिमनुवचनमेव संवादतयोदाहृतम्। एवं पूर्व-सूत्रप्रतिपन्नानुकल्पपरत्वे त्रिवृत्सूत्रयज्ञोपवीत मापस्तम्बानभिमतमेव भवेत्। पूर्वसूत्रे कार्यमनभिधायानुकल्पपरद्वितीयसूत्रेऽनुकल्पस्य फलाभिधानात् पूर्वप्रतिपन्नस्य मुख्यस्य तत्फलकत्वाभिधानेन अग्रान्थिकता चाभिव्यक्ता भवति।

एवं मुक्ताफलादौ मुख्ययज्ञोपवीतप्रकरणे अपि वा सूत्रमेवोपवीतार्थ इति सूत्रोदाहरणमप्यनुपपन्नं स्यात्। पूर्वसूत्रस्यासंकोचेन विधायकत्वपरतया वस्त्रकार्य-करत्वप्रतिपादकतया क्वचित्क्वचित् द्वितीयवस्त्र-धारणादि-प्रस्तावे मुक्ताफलादौ पूर्वोत्तर-सूत्रयोस्समुच्चित्योपादानमप्यविरुद्धम्।

अपि च नित्यमुत्तरं वासः कार्यमित्यस्य सूत्रस्य भवदभिमतार्थकत्वे पुष्टिकाम-प्रयोगे **"सोत्तराच्छादनश्चैव यज्ञोपवीती भुञ्जीत"** इति सूत्रप्रणयनमफलम्। भोजन-काले सर्वसाधारण्येन भवत्पक्षे सामान्यविशेषविधिभ्यां भवदुक्त यज्ञोपवीतसिद्धेः। ममतूत्तराच्छादनमुपरिवासः, तेन यज्ञोपवीतं कृत्वा भुञ्जीत। यज्ञोपवीतमिहमुख्यं सूत्रपक्षस्याभिमतत्वेऽपि पुष्टिकामो भोजनकाले वाससैव मुख्ययज्ञोपवीतं कृत्वा भुञ्जीत। अपि वा सूत्रमेवेतिकल्पस्तदा न भवतीति केचित्कारमते सप्रयोजनत्वं सूत्रपक्षस्यैवाप-स्तम्बाभिमतत्वात् पुष्टिकामेन भोजनकाले वाससा च यज्ञोपवीतं कर्तव्यमिति समुच्चय-पक्षे सार्थक्यं चेति तत्सूत्रतदृव्याख्यानैकरस्यं च भवति।

उत्तरोत्तरीयोत्तराच्छादनादिपदानां पर्यायत्वादुत्तराच्छादनमुपरिवास इति व्याख्यानेनोत्तरपदस्य व्याख्यातप्रायत्वाच्च। न च तत्र लक्षणा, मुख्यार्थमादाय सोत्त-राच्छादनो भुञ्जीतेत्येतावताऽभीष्टसिद्धौ लाक्षणिकपदघटितगुरुतरसूत्रप्रणयनस्य सूत्र-लक्षणासंस्पृष्टत्वापत्तेश्च। किञ्चापिवेस्यादिसूत्रस्य गृहस्थैकान्तोत्तरीयानुकल्पपरत्वे ब्रह्मचारि प्रकरणस्थयो[1] **"यँज्ञोपवीती द्विवस्त्रः अधोनिवीतस्त्वेकवस्त्र"**[2] इति **"यदा द्विवस्त्र स्तदाऽन्यतरेण यज्ञोपवीती स्यात् अपि वा सूत्रमेवोपवीतार्थं इत्येषकल्पस्तदा न भवति**[3] **यदात्वेकववस्त्रो भवति तदाऽधोनिवीतस्स्यात् न तस्य दीर्घंस्याप्येकदेशेन उत्तरीयं कुर्यादिति"**[4] सूत्रतद्व्याख्यानवचनयोरस्वारस्यं स्फुटमेव।[5] "काषायञ्चैके वस्त्रमुपदिशन्ती"त्यादिना द्वितीयवस्त्रे पक्षद्वयमुपक्षिप्याजिनत्वेवोत्तरं धारणेयेदिति स्वपक्षस्याभिधानात् यदा द्विवस्त्र इत्यादिनैतत्पक्षे मुख्ययज्ञोपवीतसूत्रकल्पस्य न प्रवृत्तिः। यदा त्वेकवस्त्रस्तदा न तस्यैकदेशेनोत्तरीयकार्यं कुर्यात् तदा अपिवेति सूत्रपक्ष एवेति तदाशयात्।

वस्त्रं यज्ञोपवीतार्थं इति वचनसंवादोऽपि न शोभते। तस्य मुख्ययज्ञोपवीत-परतया निबन्धनकारोदाहृतस्यास्माकमेवानुगुणत्वादिति।

## उत्तरं वासः कर्तव्यमित्यस्य द्वितीयवासोमात्रपरत्वम्

यदपि **एतेनउत्तरं वासः कर्तव्यं पञ्चस्वेतेषु कर्मसु। स्वाध्यायोत्सर्गदानेषु भुक्त्याचामनयोस्तथा।"** इति बोधायनवचने वचनान्तरेषु च स्वाध्यायादिग्रहणं

१. आ-ध० १-२-६-१८-३ उज्ज्वला
२. ,, ,, ,, १९ ,,
३. आ० ध० १-१-३.८
४. ,, ,,
५. ,, ,,

कर्मान्तरस्यापि प्रदर्शकमिति सिद्धं वास उत्तरं उपवीताख्य विन्यास विशेषविशिष्टं कर्तव्यमिति स्वयं व्याख्याय चन्द्रिकास्मृतिमुक्ताफलादिषु मूत्रपुरीषोत्सर्गपरतया व्याख्यातोत्सर्ग-पदविरोधमाशङ्क्य तटाकादीनां त्याग उत्सर्ग इत्यनेनान्यथासिद्धात्यन्तक्लिष्टार्थं वर्णनं। तदपि नवीनाचारसमर्थनाग्रहविजृम्भितम्। तस्य मुख्यार्थद्वितीयवासोमात्र विधायकत्वेन स्मृतिमुक्ताफलादिसर्वपूर्वापरग्रन्थ-सन्दर्भोपपत्तेः।

## उत्तरीयं योगपट्टमित्यस्यानापस्तम्बिपरत्वनिराकरणम्

**यत्तु-उत्तरीयं योगपट्टं तर्जन्यां रजतं यथा।**
**न जीवत्पितृकः कुर्यात् तिलैः कृष्णैश्च तर्पणम्॥**

इति विन्यासविशेषविशिष्टोत्तरवासोनिषेधपरतया वरदराजीयाद्युदाहृतवचनबलाद्विशिष्टे शक्तिसमर्थनम्, तदपि पामरप्रतारणमात्रम्। नहि गङ्गायां घोष इति क्वाचित्कप्रयोगमात्रात् गङ्गादिपदानां तीरादिशक्तिनिश्चयस्सुशकः। अविशेषेण सर्वेषां द्वितीयवासो विधायकबहुप्रमाणसंकोचभयादाचारविरोधाच्च शक्यार्थ विषयकत्वं न संभवतीति निबन्धनकारास्तद्वचनस्य लक्ष्यार्थपरत्वं स्वीचक्रुः।

**उत्तरीयं कटौ बद्ध्वा याजुषस्स्नानमाचरेत्।**
**उत्तरीयं कटौ बद्ध्वा ऊर्ध्वपुण्ड्राणि धारयेत्।**

इत्यादिसंग्रहकारादिवचनबलात् स्नानादि कालेषु नित्यमुत्तरं वासः कार्यमिति सूत्रस्य संकोचं ब्रुवन्त एव—

**उत्तरीयं योगपट्टं तर्जन्यां रौप्य-धारणम्।**
**न जीवपितृकः कुर्यात् तिलैः कृष्णैश्च तर्पणम्॥**
**योगपट्टोत्तरीये च तर्जन्यां रजतं तथा।**
**न जीवपितृकै र्धार्यं ज्येष्ठो वा विद्यते यदि॥**

इत्यादिवचनानां वरदराजीयाद्युदाहृतानामनापस्तम्बिविषयतया प्रागुक्तसूत्रस्यासंकोचकथने स्वपूर्वापरवाक्यविरोधमपि न जानन्तीति चित्रीयते चेत इति।

वस्तुतस्तु **'उत्तरीयं कटौ बद्ध्वेति'** वचनं पक्षप्राप्तविन्यासान्तरव्यवच्छेदकम्।' **'उत्तरीयं योगपट्टमित्यादिवचनं** तु जीवत्पितृकस्य जीवज्ज्येष्ठस्य च पक्षप्राप्तोपवीतसंनिवेशनिषेधकम्। **'नित्यमुत्तरं वासः'** कार्यमिति तूपरिवासोमात्रविधायकमिति न विरोधगन्धोऽपि।

**'उत्तरीयं योगपट्टमिति'** वचने उत्तरीय-योगपट्टपदयोस्सामानाधिकरण्यमुपगम्य योगपट्टरूपोत्तरीयधारणं जीवत्पितृको न कुर्यादित्यर्थः। अत एव **मुक्ताफलाह्निक**

काण्डे—

योगपट्टोत्तरीये च तर्जन्यां रजतं तथा ।
न जीवपितृकै र्धार्यं ज्येष्ठो वा विद्यते यदि ॥

इति वचनशरीरदर्शनमुपपद्यते । एवं च पृष्ठमुदरपार्श्वभागौ जानुनी चालम्ब्य बन्धनरूपः योगपट्टशब्दितो यस्सन्निवेशविशेषः तद्विशिष्टोपरिवस्त्रनिषेधपरत्वात् न तत्राप्युत्तरीय पदस्य मुख्यार्थत्यागो लक्ष्यार्थपरिग्रहो वेत्यपि केचित् ।

## उपासने देशिकानामित्यापस्तम्बस्मृतेरप्रसिद्धिः, प्रसिद्धावपि उपासन-इति तदीयसूत्रसमानार्थकता, द्वितीयवस्त्रावश्यकतामात्रपरत्वं वा

यदपि च—

उपासने देशिकानां वृद्धानां पूजनेऽतिथेः ।
होमे जपक्रियायां च वैश्वदेवे च भोजने ।
स्वाध्यायाचामपूजासु वस्त्रं यज्ञोपवीतवत् ।
धार्यं विप्रेण विधिवत् अन्यथा कर्म निष्फलम् ॥

इत्यापस्तम्बस्मृतिबलाद्गौणोपवीतवर्णनं, तदप्यपेशलम् । वचनमेवेदानीन्तन-कोशे न दृश्यते । निबन्धनकारैरपि न केनचिदुदाहृतम् । एककर्तृकग्रन्थेषु उपासने गुरूणामिति सूत्रसच्छवायस्यास्य वचनस्य प्रवृत्तिप्रयोजनमपि दुर्वचम् । तादृशस्मृतिकर्तुं स्सूत्रकर्त्रापस्तम्बभिन्नत्वे च गुरूणामुपासन इति सूत्रसमानार्थकताया भवद्भिरेवाभ्युपगन्तव्यत्वात् तद्वन्मुख्ययज्ञोपवीतपरमेव भवेत् ।

न च यज्ञोपवीतवद्धार्यमित्यस्यानन्वयः, यज्ञोपवीतशब्दस्य क्वचित्क्वचिद्विन्यास-विशेषार्थकतया निबन्धनकारै - र्व्याख्यानात् । बहुतरप्रत्यभिज्ञापकानुरोधेनैकार्थ-सिद्धौ विन्यासविशेषार्थकतामत्रत्ययज्ञोपवीतपदस्य स्वीकृत्य तद्वत्तद्विशिष्टं वस्त्रं विधि-वद्धार्यमित्यन्वय संभवात् । वस्तुतस्तु वस्त्रधारणावश्यकत्वपरतयैतद्वचनं योजयितुं शक्यते । यज्ञोपवीतं-यथाऽवश्यं धार्यं तद्वद्वस्त्रमपीति । विधिवत्पदेनापि स्वरसत आवश्यकत्वांशे परं दृष्टान्तता । न तु संनिवेशांशेऽपीति लभ्यते । धारणं तु विधिवत् वस्त्रधारणस्य यो विधि स्तमनुसृत्य धर्तव्यमिति वक्तुं शक्यत्वात् । न हि विधानादेवा-वश्यकतासिद्धे स्तदंशे दृष्टान्तकथनं विफलमिति शङ्क्यम् आवश्यकत्वसिद्धावपि दाढ्यार्थम्—

"नान्तरा भोजनं कुर्यात् अग्निहोत्रसमो विधिः ।
अष्टोत्तरशतं मालामानेन स्कन्धलम्बितम् ॥

तुलसीपद्ममणिभि धारयेदुपवीतवत् ।
त्रिदण्डमुपवीतं च शिखावद्बिभृयाद्यतिः ॥
उपवीतादिवद्धार्या श्शङ्खचक्रादयस्तथा ।
ब्राह्मणस्य विशेषेण वैष्णवस्य विशेषतः ।
शिखोपवीतवद्धार्यमूर्ध्वपुण्ड्रं द्विजन्मनाम् ॥
कौपीन - धारणायाथ शुल्बं कृत्वोपवीतवत् ।
यतिश्च ब्रह्मचारी च दधातां द्विः प्रदक्षिणम् ।
स्नात्वा चाचम्य विधिवत्तिष्ठन्नासीन एव वा ।
बिभ्रज्जलपवित्रं वाप्यक्षसूत्रं करद्वये ।
तद्वत्पवित्रे गोवालै धृते दुष्कृत - नाशने ।
स्थावरं जङ्गमं बीजं तैजसं विषमायुधम् ।
षडेतानि न गृह्णीया द्यतिर्मूत्रपुरीषवत् ।
विविधानि च शिल्पानि वर्जयेत्परदारवत् ।
भिक्षाशनं जपस्नानं ध्यानं शौचं सुरार्चनम् ।
कर्तव्यानि षडेतानि सर्वदा नृपदण्डवत् ।
अग्निहोत्रविनाशे तु जुह्वादीनि यथा त्यजेत् ।
यथा च मेखलादीनि गृहस्थाश्रमवाञ्छया ।
पत्नी योक्त्रं यथेष्टचन्ते सोमान्ते च यथा ग्रहान् ।
तद्वद्यज्ञोपवीतस्य त्यागमिच्छन्ति योगिनः ॥

इत्यादिषु तत्रतत्र विधिनिषेधस्थलेषु बहुशस्स्मृतिषु दृष्टान्तदर्शनाच्च । वस्त्रं यज्ञोपवीतकमिति पाठपरिकल्पनेऽपि वस्त्रं यज्ञोपवीतं च विधिवद्धार्यमित्यर्थस्सुगम एव । यज्ञोपवीतग्रहणं दृष्टान्तार्थमित्यस्यापि सुवचत्वाच्च ।

यत्तु बोधायनसूत्रे देवादितर्पणप्रकरणे "**नार्द्रवासा नैकवस्त्रो दैवानि कर्माण्यनुसंचरेत् पितृसंयुक्तानि चेत्येके**" एकवस्त्रलक्षणमाह योगयाज्ञवल्क्यः

**सव्यादंसात्परिभ्रष्टं ( भ्रष्टपटं ) कटिदेशधृताम्बरम् ।**
**एकवस्त्रं कृतं विद्यात् दैवं पित्र्यं च वर्जयेत् ॥**

इति सव्यांसे पटहीनं कटिदेश एव धृतमम्बरं येन स तथोक्त इति स्मृतिमुक्ताफले स्मृतिरत्नमहोदधौ चोक्तम् । सव्यं दक्षिणवामयोरिति निघण्टुः ।
श्री विष्णुपुराणे—

**होमदेवार्चनाद्यासु क्रियासु पठने तथा ।**
**नैकवस्त्रः प्रवर्तेत द्विज आचमने जपे ॥**

**गोभिलः—** **एकवस्त्रो न भुञ्जीत न कुर्याद्देवतार्चनम् ।**
**न कुर्यात्पितृकार्याणि दानं होमं जपं तथा ।**
**योगयाज्ञवल्क्यः—स्नानं दानं जपं होमं स्वाध्यायं पितृतर्पणम् ।**
**नैकवस्त्रो द्विजः कुर्यात् श्राद्धभोजनसत्क्रियाः ॥**

पितृतर्पणश्राद्धयो निर्षेधः बोधायनसूत्रनिष्ठव्यतिरिक्तविषयः । तत्सूत्रे **'पितृसंयुक्तानि चेत्येके'** इति विकल्पोक्तेरित्यादिना स्वोत्प्रेक्षितनिर्वहणम् ।

तदपि न युक्तिसहम् । बोधायनीयादिवचनगतैकवस्त्रपदस्य द्वितीयवस्त्रशून्यपरत्वात्-अकच्छोऽनुत्तरीयश्चेति **भार्गववचन समानार्थकत्वात् ।**

## सव्यादंसात्परि भ्रष्ट इति वचनार्थनिरूपणम्

न चैकवस्त्रलक्षणपरतयाऽवतारितात् सव्यादंसादिति योगयाज्ञवल्क्यवचनादभिमतसिद्धिश्शंक्या । यदि सव्यपदेन वामदक्षिणयोर्ग्रहणमभिमतं, तदा व्यवच्छेद्याभावात् अंसे पटहीनमित्येवोच्यतां, सव्यपदस्य दक्षिणपरत्वे च लक्षणाप्यावश्यकीति युगपद्वृत्तिद्वयविरोधः । न च दर्शितकोशाच्छक्तिसिद्धिः । सव्यमपसव्यमित्यादिषु परस्परभिन्नार्थकतायास्स्पष्टत्वात् । सव्यस्यांसस्येत्यादिषु वाममात्रबोधकत्वात् । अमरकोशे वाममात्र एव **"वामं शरीरे सव्यं स्यादपसव्यं तु दक्षिणम्"** इति पाठात् क्वाचित्कलाक्षणिक प्रयोगमादायापि **"वेदस्तत्वं तपो ब्रह्म चरुस्स्थाल्यां हविष्यपि । पीलुः काण्डे द्रुमे गजे"** इत्यादिवत्प्रागुपदर्शितकोशोपपत्तेः । भवतु वा शक्तिसिद्धिः । तथाप्युभयसाधारणशक्यतावच्छेदकस्य दुर्लभतया **सकृदुच्चरित** इति न्यायविरोधादावृत्तिः कल्प्या । तावतापि नाभिमतसिद्धिः । सव्यांसावलम्बितया दक्षिणांसावलम्बितया उभयांसावलम्बितया वा दैवे प्राचीनावीतितया पित्र्ये उपवीततया धारणेष्येतद्वचनार्थानुष्ठानसिद्धेः ।

**"स्नानं दानं जपं होमं स्वाध्यायं पितृतर्पणम् ।**
**नैकवस्त्रो द्विजः कुर्याच्छ्राद्धभोजनसत्क्रियाः ।**

इति योगयाज्ञवल्क्यीय पूर्ववचने स्नानेऽप्येकवस्त्रत्वनिषेधात् **"उत्तरीयं कटौ बद्ध्वा याजुषस्नानमाचरेत्"** इति संग्रहवचनात्स्नानकाले भवदभिमतविन्यासाभावावगत्या भवदुक्तैकवस्त्रलक्षणसत्वात् तद्वचनविरोधो दुर्वार एव । न च स्नानामिह स्थलस्थ स्नानं यथा **"ब्रह्मचार्येकवासास्तिष्ठन् न स्नानजपहोमी स्यादिति"** वैखानसे धर्मसूत्रे—"अन्यथा **उत्तरीयं कटौवद्ध्वा याजुषस्स्नानमाचरेत् "वामप्रकोष्ठे निक्षिप्य बह्वृचस्स्नानमाचरेत्"** इति संग्रहवचनविरोधादित्यनेनोक्तं युक्तम् ।

विखनस्सूत्रे स्नानसामान्य एव ब्रह्मचारिणोऽप्येक वस्त्रत्वप्रतिषेधात् तद्वचन-विरोधो दुरुद्धर एव। तदनुरोधेन 'स्नानं दान' मित्यत्र स्नानपदसंकोचकथनमपि दृष्टान्त एव संकोचाभावादुपहास्यम्। तदपेक्ष्य सव्यांसपदस्यावयुत्यानुवादतया उपरि भागोपलक्षकत्वं स्वीकृत्य उपरिभागे वस्त्रहीनः सव्यांसे पटहीन इत्यत्र सव्यांस-सम्बन्धित्वस्य पटान्वयमुपगम्य सव्यांससंबन्धी यः पटस्तेन हीन इति वाऽवधारणगर्भ-बहुव्रीहिसमासनिष्पन्नकटिदेशधृताम्बरपदार्थघटकावधारणार्थप्रतिपादकतया एकवस्त्र-पदार्थप्रतिपादकत्वाङ्गीकारे सव्यांसपदास्वारस्येऽपि स्नानं दानमित्यादि पूर्वश्लोकस्स्य स्नानपदान्वये निबन्धनकारानुक्ता प्रामाणिक संकोचरूपक्लेशाभावः। स्मृतिमुक्ताफले द्वितीयवस्त्रधारणं प्रतिपाद्य तदुपपादकतयोदाहृतानां—

**"उत्तरं वासः कर्तव्यं पञ्चस्वेतेषु कर्मसु।**
**स्वाध्यायोत्सर्गदानेषु भुक्त्याचमनयो स्तथा।**

उत्सर्गो मूत्रपुरीषादे र्विसर्गः। एतत्सर्वकर्मोपलक्षणार्थम्। अनुत्तरीयस्य भृगुणा **"विकच्छोऽनुत्तरीयश्चे"**ति निषिद्धत्वात्, नित्यमुत्तरं वासः कार्यमित्यादीनामै-कार्थ्यम् तत्रैव पूर्वोदाहृतस्य।

**"जपे होमे तथा स्नाने दैवे पित्र्ये च कर्मणि।**
**बद्ध्नीयान्नासुरीं कक्ष्यां शेषकाले यथेच्छया॥"**

इति वचनस्य स्वरसार्थता च निर्वहति। तत्र सव्यादंसादिति वचनोपादानं तु उत्तरीयधारणावश्यकत्वपरतया—

**"स्नानं दानं जपं होमं स्वाध्यायं पितृतर्पणम्।**
**नैकवस्त्रो द्विजः कुर्यात् श्राद्धभोजनसत्क्रियाः॥**

इत्याद्येकवस्त्रपदघटितवचनोपादानमयुक्तमुत्तरीयाभावेऽपि कौपीनवाससा द्विवस्त्रत्वा दित्याशङ्क्यायां स एव लक्षणमाह—**'सव्यादंसादिति'** इत्येकवस्त्रपदार्थप्रतिपादन-परतया। एवं चात्रैकवस्त्रपदेन उत्तरवस्त्राभाववत एव बोधात्तदुपादानं युक्तमेवेति-रीत्या विज्ञेयम्।

अस्य वचनस्यैतादृशमन्दप्रयोजनत्वादेव माधवीयादिषु द्वितीयवस्त्रधारणप्रकरणे **'अकच्छोऽनुत्तरीयश्च, नैकवासाः प्रकुर्वीत, एकवस्त्रो न भुञ्जीत, उत्तरीयव्यतीतस्य"** इत्यादिवचनोदाहरणप्रस्तावे एतद्वचनानुदाहरणोपपत्तिः।

अत एव स्नातकस्य द्वितीयवस्त्रधारणावश्यकत्वप्रतिपादनप्रकरणे [1]गृह्यरत्ने— **"नित्यमुत्तरं वासः कार्यम्, स्नातकानां द्वितीयं स्यादन्तर्वासस्तथोत्तरम्, उत्तरीयव्यती-**

१. गृ. र. १३ स्व.

**तस्य समस्ता निष्फलाः क्रियाः**, इत्यादिवचनसमानतया **'अकच्छः पुच्छकच्छो वाऽद्विकच्छः कटिवेष्टितः''** इति वचनोदाहरणोपपत्तिः। उत्तरीयव्यतीतपदसमानार्थकतायाः कटिवेष्टितपदे प्रतीतेः कटावेव वेष्टितं वस्त्रं यस्येत्यवधारणगर्भबहुव्रीहि समासनिष्पन्नत्वात् कट्युपरिभागे वस्त्रहीनः कटौ वस्त्रयुक्तः कटिवेष्टितपदार्थ इति प्रतीतेः।

एतेनो[1] ''पनयनवन्नपरिधान''मिति गृह्यरत्नवाक्येन बहिर्वस्त्रस्य पूर्वपक्ष्यभिमतविन्यासविशेषसिद्धिरिति केषाञ्चिदुद्घोषोऽपि समुद्रघोष एव।

तत्र हि ''अथोपद्रष्टा रेवतीस्त्वेति द्वाभ्यामुत्तरीयमभिमन्त्र्य या अकृन्तन्निति त्रिभिराच्छाद्याच्छादितोत्तरीयं परीदं वास इत्यनुमन्त्रयेत्। ''नित्यमुत्तरं वासः कार्य''मिति नियमात् स्नातकानां द्वितीयं स्यादन्तर्वासस्तथोत्तरमिति मनुना स्नातकस्यान्तरीयोत्तरीयविधानात् ''उत्तरीयव्यतीतस्य समस्ता निष्फलाः क्रिया'' इति वचनात् कटिवेष्टितवस्त्रस्य नग्नत्वस्मरणात् रेवतीस्त्वेति समानमित्वभिमन्त्रण मात्रातिदेशात् धर्मशास्त्रेषूत्तरशब्दस्योत्तरीये प्रसिद्धे रुपनयनवन्नपरिधानं परिधानशब्दस्यात्राच्छादनपरत्वात्। अन्यथा ''गोचर्म परिधायेत्यादिषु कटिवेष्टनप्रसक्ते''रिति गृह्यरत्नपङ्क्तिः।

कण्ठभूषणे[2] **''अहतमुत्तरं वास'** इति सूत्रमत्रभाव्यमिति सूत्रं बहिर्वस्त्रावश्यकत्वे प्रमाणतयाऽभिधाय नन्विदमयुक्तम् अहतमुत्तरं वास इत्यत्र परिधानमेव न तूत्तरीयं तदुपनयनेन समानमिति व्याख्यातत्वात्'' इत्यनेन तात्पर्यदर्शनोक्ताग्रिमपक्षरीत्या पूर्वपक्षं प्रापय्य नैवं साधीयः उत्तरीयमेव न परिधानं, उत्तरमितिवचनादित्यादिना सिद्धान्तितम्।

तात्पर्यदर्शने[4] **''चोत्तरेण यजुषा''** ''अहतमन्तरं वास परिधाये'' त्यादिकृत्स्नसूत्रस्यान्तरीयपरत्वमेव प्रथमपक्षेऽभिहितम्। तत्रान्तरं वासोऽन्तरीयमित्यर्थ इति व्याख्याय अहतमुत्तरं वासः परिधानमेव नोत्तरीयं तदुपनयनेन समानमित्यभिधाय कुतः पुनरहतमुत्तरं वास इत्यनेनापि परिधानमेवोच्यते नोत्तरीयम्। उच्यते–''रेवतीस्त्वेति समानमुपनयनेनेति'' वचनात् उपनयने च तिसृभिः परिधाप्य ''परिहितमुत्तरये''ति परिधानार्थवासोऽवगमात् अपूर्वस्याहत मन्तरं वासइति चोदितत्वाच्च उत्तरीयं तु नित्यमुत्तरं वासः कार्यमिति वचनादत्रापि सिद्धमेवेत्यभिहितम्। तत्र च ''परिधानान्यधोंशुके'' इति कोशात् ''कुतः पुनः परिधानमेवोच्यते'' **''उत्तरीयं तु नित्यमुत्तरं**

१. ,, ,, ,, ,,

२-३. गृह्य-कण्ठ—पृ० १५९, १६०, १६१.

४. आ-गृ-सू-तात्प—५.१२.७.

**वासः कार्य**"मिति वचनादत्रापि सिद्धमेव" इत्यत्र वाक्यद्वयाच्च कृत्स्नसूत्रमन्तरीयपरमेवेति प्रथमपक्षरीत्या वाक्यार्थः प्रतीयते । नत्वेकस्यैव वस्त्रस्य विन्यासभेदः ।

[1]कण्ठभूषणे पुनः—"परिधाप्य परीदमित्यनुपपत्ते"रित्यादिना चोद्यपूर्वकं तस्मादुत्तरीयमेव न परिधानम् । इममर्थं स्पष्टमेवाचष्टे समावर्तनखण्डे वैखानसः "वास इति वस्त्रं परिधाय सोमस्यतनूरसीत्युत्तरीयं गृह्णाती"ति । बोधायनश्च स्नातकोऽन्तर्वासस्युत्तरीयमिति' इत्यभिहितम् । उदाहृतवैखानसबोधायनग्रन्थयोः स्नातकस्यान्तरीयमुत्तरीयं चेति वस्त्रद्वयप्रतीतेरहतमन्तरं वास इति स्नातकमधिकृत्यप्रवृत्ते सूत्रेऽपि वस्त्रद्वयविधानमितिलभ्यते । नहि तादृशग्रन्थयोर्विन्यासविशेषप्रतीतिः ।

[2]तदुपरि च—ननु नित्यमुत्तरं वासः कार्यमितिविहितत्वादित्यादिना तद्विधानमाक्षिप्य तस्य गृहस्थमधिकृत्य प्रवृत्तत्वान्नात्र तत्प्रसङ्गः । अतोऽनुत्तरीयत्वे नैष्फल्यप्रसङ्गो दुर्वार इत्यनेन स्नातकस्य न तत उत्तरीयलाभ इत्यनुत्तरीयत्वे उत्तरीयव्यतीतस्येत्यादिनाभिहितकर्मनैष्फल्यापत्त्या उत्तरशब्द-स्वारस्याच्च परिधानशब्दस्य धोभागाच्छदनपरत्वेऽपि अत्रत्यपरिधानशब्दस्य वाससी परिधाय गोचर्मपरिधायेत्यादाविवाच्छादनमात्रपरत्वं चाभ्युपगम्याहतमुत्तरमित्यादिसूत्रखण्डः स्नातकस्य द्वितीय वस्त्रविधायक एवेति च सिद्धान्तितम् ।

अयमर्थो गृह्यरत्नकण्ठभूषणतात्पर्यदर्शन-कृत्स्नस्नातक-प्रकरणकृत्स्नग्रन्थपरिचयशालिनां सुगम एवेति ।

अत एव[3] माल्यालिप्तमुख उपलिप्तकेशश्मश्रुरक्तोभ्यक्तो वेष्टित्युपवेष्टितीत्यादि स्नातकवृत्तप्रतिपादकसूत्रोज्ज्वलायामुपवेष्टिती कटिप्रदेशो द्वितीयेन वाससा वेष्टितो यस्य स उपवेष्टिनी त्यादिदर्शनमुपपद्यते ।

न हि कटिदेशस्योपरि भागे द्वितीयवस्त्रधारणे कटिवेष्टितवस्त्रत्वरूपं नग्नत्वं, न हि पूर्वपक्षिणोऽपि स्नानकाले ऊर्द्धपुण्ड्रधारणकालादौ वा सङ्ग्रहादिवचनबलात् द्वितीयवस्त्रस्य कट्युपरि धारणान्नग्नत्वमिष्टम्, इष्टमेवेति ब्रूम इति चेन्न "न नग्नस्नानमाचरेत्" "ननग्नः किञ्चिदाचरेत्" "उत्तरीयव्यतीतस्य समस्ता निष्फलाः क्रियाः" इत्यादिवचनानां विरोधः । कटावुत्तरीयसद्भावस्यासद्भावस्य च भवतां समानत्वेन तीरादौ निक्षिप्यापि स्नानाद्यनुष्ठानापत्तिः । संग्रहकारवचनबलात्तथाऽनुष्ठाने च तादृशवचनानामस्मदुक्तरीत्या नियमविधित्वे संभवति अपूर्वविधित्वकल्पनाक्लेशश्चेत्यादि-बहुतरासामञ्जस्यप्रसङ्गात् ।

---

१-२. कण्ठ-पृ० १६०, १६१

३. आ-ध-सू-१-२.८.२.

अस्मत्पक्षे चान्तरीयमधोभागाच्छादकम् उत्तरीयमूर्ध्वभागाच्छादकं अधोभागाच्छादने च कच्छादिनियमो वचनान्तराल्लभ्यते। उत्तरीये चानियमेनोर्ध्वभागाच्छादन-प्रमक्तौ स्नानादौ कटिशब्दोपलक्षितकटिसन्निहितनाभ्युपरिदेशाच्छादननियमो विधीयत इति न नग्नत्वानुत्तरीयत्वाद्यापत्तिरिति सर्वसामञ्जस्यात्।

यदाऽऽच्छादननियमो न वचनान्तराल्लभ्यते तदाऽनियम एव। अत एव देशिकदण्डक-द्वात्रिंशदादौ **"वलक्षांशुक-द्वन्द्व-राजत्कटीके, विश्वासं दिशतां महान्तमिह मे वेदान्तसूरेः कटीदेशस्योपरि भाग इन्दु धवल स्वादूत्तरीयोज्ज्वलः"** इत्याद्यभियुक्तप्रयोगोपपत्तिः।

यत्र क्वचिद्विन्यासभेदप्रतिपादने सत्यपि अनियमं वदतामस्माकमिष्टमेवेत्यादिकमवधेयम्।

एतेनोत्तरीयावश्यकतापराणि उत्तरोत्तरीयोत्तरासंगादि पदघटितानि पूर्वपक्ष्युदाहृतानि सर्वाण्यपि वचनानि व्याख्यातप्रायाणीति ग्रन्थविस्तरभिया एकैकश उपादानाद्विरम्यते।

## यतीनां वस्त्रयज्ञोपवीतनिराकरणम्

यदपि—"उपवीतोत्तरासंगदण्डकौपीनमेखलाः।
**कुण्डिकाछत्रवासांसि यतिर्दध्यात्तु नित्यशः॥**

विखनस्सूत्रे सन्यासक्रममारभ्य **मेखलां चत्वार्युपवीतानि एकं वोपवीतं कृष्णाजिनमुत्तरीयं च पूर्ववत्परिदधातीति यतेरुत्तरीयवर्णनं**, तच्चिन्त्यम्।

यतेर्द्वितीयवस्त्रस्य **'अथ परिव्राजकोलिङ्गो कुण्डिकां वासो बिभृयान्नोत्तरीयं त्रिदण्डं जलपवित्र कमण्डलुं कन्था** चेति गालववचनेनोपरिवाससः कण्ठतो निषिद्धत्वात् शौनकवसिष्ठात्रि-मेधातिथि-क्रतु-गौतम-बृहस्पति-हारीत शङ्खलिखित-यम-व्यासवचनै र्द्वितीयवस्त्रानषेधसिद्धे वक्ष्यमाणत्वेन उत्तरायवासस्स्थाने त्रिवृदेकसूत्रस्य दत्तात्रेयात्रिभ्यां विहितत्वेन तस्यैवैतद्वचनस्थोत्तरासङ्गपदेन विवक्षितत्वात्। अत एव यतिधर्मसमुच्चये क्रतुः—

**विंशतिं धारयेन्मात्रां दश वा पञ्चनित्यशः।**
**कन्थां सूच्यजिनं छत्रं पवित्रं कुण्डिकासनम्।**
**पात्रशिक्याक्षसूत्राणि मृत्खनित्रमुपानहौ।**
**गुह्याच्छादस्त्रिपादी च पादुके दण्डपक्षिणी।**
**योगपट्टो बहिर्वासो मात्राख्यार्विंशतिस्स्मृता।**
**आसां विंशतिमात्रणां पञ्चमात्राश्च नित्यदा।**

ताश्चोपवीतत्रिदण्डजलपवित्रपात्रकटिसूत्राख्याः। तथा च **विष्णुः**।

**उपवीतं त्रिदण्डं च पात्रं जलपवित्रकम्।**
**कौपीनं कटिसूत्रं च न त्याज्यं यावदायुषम्॥**

इति विंशतिमात्रासु पठितस्य द्वितीयवाससो वृद्धातुरादिविषयताभिप्रायेण शीतत्राणार्थं कम्बलमेक इति शङ्खाद्युक्तन्यायेन ज्ञानिनां मात्राधारणनिषेधमुपक्षिप्य सम्यग्ज्ञानिनामपि पञ्चमात्राधारणमवश्यं कर्तव्यमेवेति निगमनेन द्वितीयवासोविधेरज्ञानि विषयत्वसंभवस्सूचितः। न च यतिधर्मसमुच्चयोक्तक्रमोऽनतिलङ्घनीय इति नियमाभावाद्वचनान्तरबलेनोत्तरीय मुपादेयमेवेतिवाच्यम् श्रीशतदूषण्यां तत्समुच्चितस्यैव **"यतिधर्मस्याद्यापि मानवादिवदविगानात् सर्वशिष्टपरिग्रहा"**, दित्यनुगृहीतत्वात्। एतेन **"त्रयस्तु-वैणवादण्डा यतेः काषाय-वाससी"** इति वृद्धहारीतवचनम्

**एकवासा द्विवासश्च शिखा यज्ञोपवीतवान्।**
**कमण्डलुकरो विद्वान् त्रिदण्डी याति तत्पदम्॥**

इति व्यासवचनमपि व्याख्यातम्। परमहंसानामपि **त्रिदण्डजलपवित्रशिखायज्ञोपवीत्यनोन्तर्वासो बहिर्वासोधारिण"** इति पराशरसूत्रे चान्तर्वासः कौपीनवासः बहिर्वासः कटिवेष्टन वासः, **"अन्यत्प्रयतं कौपीनंबहिर्वासश्च परिधाये'ति** शौनकसूत्रे बहिर्वासः प्रतिसम्बन्ध्यन्तर्वाससः कौपीनरूपत्वे शक्तेरिति न कटिवेष्टनवासोभिन्नबहिर्वासो भवदभिमतं सिद्धयति। एवं च वासोद्वयोक्तीनामेषोऽपि निर्वाहो बोध्यः। एकमेव यतेर्वास इति वचनशतसिद्धम्। तथा च शौनकः **'अन्यत्प्रयतं कौपीनं बहिर्वासश्च परिधाये'ति**। वसिष्ठः "सप्तागाराण्यसंहितानि चरेत्, विधूमे सन्नमुसले एकशाटी परिवृतोऽजिनेनवेति", "एकशाटी परिवृतोऽजिनेन वा गोप्रलूनैस्तृणै रवस्तृतशरीरस्स्थण्डिलशाय्यनित्यां वसतिं वसेदिति च,"

**अत्रिः**—

**एवं ध्यायन्नेकवासा उपवीती च पर्यटेत्।**
**वासोहि ब्रह्मणा सृष्टं सर्वधर्मप्रसिद्धये॥** इति

**एकवस्त्र्येकपात्री च सदैकाकी व्रजेद्यतिः।**
**एककालं चरेद्भैक्षं न ज्ञान्यः कथंचन॥** इति च

**मेधातिथिः**—**उर्ध्वं जान्वोरधोनाभेः परिधायैकचर्मकम्।**
**द्वितीयमन्तर्वासश्च परिधाय रविं ततः॥** इति

**त्रिदण्डं कुण्डिकांशिक्यं भैक्षभाजनमासनम्।**
**कौपीनाच्छादनं वासः षडेतानिपरिग्रहेत्॥** इति च

क्रतुः—　दृष्टिपूतपदन्यासः मौनी तु सुमनाश्शमी ।
एकवस्त्र्येकपात्री च निस्सङ्गस्सुप्रवच्चरेत् ।

गौतमः—　कौपीनार्थं वासोबिभृयात्प्रहीणमेके निर्णिज्य" इति

बृहस्पतिः—　कौपीनाच्छादनार्थं च बिभृयाज्जीर्णमम्बरम् ।
प्रहीणमेके निर्णिज्य बहिस्त्याज्यं तु यद्भवेत् ।

हारीतः—　कौपीनाच्छादनं वासः कन्थां शीतनिवारणीम्
पादुके चापि गृह्णीयात् कुर्यान्नान्यस्य सङ्ग्रहम् ।

शङ्खलिखितौ—त्रिदण्डपवित्रपाणिर्विपरिधानः　कुशचीरवल्कलवासाश्शीतत्राणार्थं कम्बलमेके ।

एकवासा अवासा वा एकदृष्टिरलोलुपः ।
अदूषयन् सतां मार्गं सुप्रवद्विचरेदिह ।
मेध्यं भैक्षं चरेन्नित्यं सायाह्ने वाग्यतश्शुचिः ।
एकवासा अवासा वा मन्दगामी युगान्तदृक् । इति
एकशाटयेकभुक्तश्च एकपात्री च भिक्षुकः ।
एकैकं विचरेद्ग्रामं तत्पुराणमृषिव्रतम् ॥ इति च

व्यासः—　कन्थाकौपीनवासा यो दण्डधृग्ध्यानतत्परः ।
एकाकी रमते नित्यं तं देवा ब्राह्मणं विदुः ॥ इति

अतो वचनशतावगतं यतेरेकवासस्त्वं न केनापि बाधयितुं युक्तम् ।

नच—　कुशपाणिस्सदा कुर्यात् उत्तरीयोर्ध्वपुण्ड्रधृक् ।
उत्तरीयोर्ध्वपुण्ड्राभ्यां रहितं तन्निरर्थकम् ॥

इत्याद्यनेकवचनैरविशेषेण श्रौतस्मार्तकर्मकर्तृसामान्यस्योत्तरीयविधानात् कथं यतेरुत्तरीयाभाव इति वाच्यम् सामान्यविधीनामुत्सर्गापवादन्यायेन संकोचस्य सर्वसंमतत्वाद्यतिविषये उत्तरीयार्थे द्रव्यान्तरस्य विहितत्वेन एकवासस्त्वस्मृतिविरुद्धस्य द्वितीय वाससोऽकल्पनीयत्वाच्च । तथाच दत्तात्रेयोऽत्रिश्च—

तन्तुत्रयमधोवृत्तं पुनश्चोर्ध्ववृतं त्रिवृत् ।
कार्पासं तान्तवं कार्यं तथैकं चोत्तरीयकम् ॥

इति त्रिवृदेकसूत्रस्योत्तरीयार्थतां विदधाते ।

न च तथैकमिति उपवीतान्तरविधिरिति भ्रमितव्यम् । त्रयप्रतिसम्बन्धिसमर्पकस्थैकपदस्य त्रित्वेनोक्ततन्तुविषयत्वस्य स्फुटत्वात् उपवीतस्यानुपस्थितत्वेन तथा कल्पनासंभवात् अतो यतेर्द्वितीयवाससः एवासिद्धौ विन्यासविशेषस्य का कथेति विभावनीयम् ।

## ब्रह्मचारियत्योरुत्तरीयस्य पुरुषार्थतानिराकरणम्

यत्तु—कर्मार्थतावेदकानां श्रुतिलिङ्गादीनामभावात् उदाहृतवचनै रुत्तरीयस्य पुरुषार्थत्वं सिद्धं भवति। तथा च ब्रह्मचारिप्रभृतीनामकर्मकालेषु उत्तरीयमावश्यकमितिवेदितव्यं इति गौणोपवीतवर्णनम्।

'तदप्यजिनंत्वेवोत्तरं धारयेदित्यनेन प्रागुपदर्शितवचनैश्चापस्तंब ब्रह्मचारिपत्यो द्वितीयवस्त्राभावेन, इतरेषां उत्तरीयपदवाच्यद्वितीयवस्त्रस्य पुरुषार्थतायामविप्रतिपत्तेश्च विन्यासविशेषस्योक्तवचनैरनाघ्रातत्वेन च निरस्तम्।

**'उत्तरीयं कटौ बद्ध्वा याजुषस्नानमाचरेत्'** इति संग्रहवचने च उत्तरीयं कटौ बद्ध्वेति बह्वृचवैलक्षण्यार्थमुक्तम्। अतो याजुषस्य छन्दोगापेक्षया लोके प्रचुरत्वात् प्रसिद्धत्वाच्च **'सृष्टीरुपदधाती'** त्यादाविव याजुषग्रहणमबह्वृचपरमवगन्तव्यम्। अनियमो वा। अतोऽनैनैकार्थ्यात् पूर्वोक्तवचनैः क्रियासामान्ये विहितं वस्त्रोपवीतमेव छन्दोगानां जलस्नानेऽप्यनुज्ञातं भवतीत्यादिकमपि व्याख्यातम्।

## प्रचेतोव्यासशाट्यायनिवचनादीनां द्वितीयवासोमात्रावश्यकतापरत्वम्

यच्च— **न हरेदेकवस्त्रस्तु नावृती न च कन्यका।**
**न पाणिना न वस्त्रेण तोयमभ्युक्षणाय वै।**
**नाहरे देकजातिस्तु न शिशुर्न च कन्यका।**
**नानुपेतो नैकवस्त्र स्तोत्रमभ्युक्षणाय वै॥**
**सोपानत्कस्सदर्भश्च पात्रस्थास्सदशोत्तरः।**
**अनुगुप्ता अपोगृह्य प्रचारार्थं गृहं व्रजेत्।**

इत्यादि प्रचेतोव्यासशाट्यायनिवचनैः कर्ता भोक्ता च सर्वत्र नैकवस्त्र इति सुधीविलोचनवचनात्, **'नैकवस्त्रो न खिन्नश्चे'**ति शाण्डिल्यवचनाच्च अभ्युक्षणाहरणे श्राद्धे भगवद्गृहगमने च गौणोपवीतवर्णनम्, तदपि एकवस्त्रोत्तरादिशब्दार्थनिरूपणेन कदर्थितम्।

## देवागारइत्यादिमनुव्यासवचतानां मुख्य यज्ञोपवीतपरत्वम्

**देवागारे गवां गोष्ठे ब्राह्मणानां क्रियापरे**
**आचामे भोजने जप्ये दक्षिणं बाहुमुद्धरेत्।**

'दक्षिणं बाहु मुद्धरे दित्यस्याजिनं वासोवेति श्रुतिविहितयज्ञोपवीतीस्यादित्यर्थं तात्पर्यमिति स्वयं व्याख्याय मनुवचनोपन्यासेन

**देवागारे गवां गोष्ठे होमे जप्ये तथैव च ।**
**स्वाध्याये भोजने चैव ब्राह्मणानां च सन्निधौ ।**
**उपासने गुरुणां च सन्ध्ययो स्साधुसंगमे ।**
**उपवीती भवेन्नित्यं विधिरेष सनातनः ॥ इति**

व्यासवचनोपन्यासेन च स्वाभीष्टसाधनमपि हेयमेव । मनुव्यासवचनयो र्मुख्ययज्ञोपवीतपरत्वसंभवात् । उपनयनप्रकरणे मुख्ययज्ञोपवीतधारणप्रमाणतयैव स्मृतिमुक्ताफलादौ दर्शित व्यासवचनोदाहरणाच्च ।

## विरवनस्सूत्रभाष्यार्चनानवनीतादिषूत्तरीयपदस्यविन्यासविशेषताप्पर्य निराकरणम्

यत्तु—विरवनस्सूत्रे भाष्यकृता नृसिंहवाजपेययाजिनाकृते भगवन्नित्यार्चनाप्रयोगे सोत्तरीयोष्णीषाङ्गुलोयकः प्रदक्षिणीकृत्येत्याद्युक्तेः अर्चनानवनीते उष्णीषं चोत्तरीयकमिति तन्मूलभृगुवचनोपादानात् विहगेन्द्रसंहितायां नित्यार्चनविधौ सोत्तरक्षौमवस्त्रकैरित्युक्त्या विश्वामित्रसंहितायां सोत्तरीयस्सितोष्णीष इति सोत्तरीयः पवित्राट्य इति चोक्तेः, पारमेश्वरेसोत्तरीयैश्च भूषणैरित्यारभ्य भगवन्तं प्रणम्यचेत्युक्तेश्च भगवदाराधनप्रणामेषु सोत्प्रेक्षितसाधनं, तदपि उत्तरीयपदार्थविवेचनेनोत्तरितप्रायम् । प्रणामादौ उत्तरीयशब्दार्थस्य उपरिवासोमात्रस्य सिध्याऽभीष्टासिद्धेः ।

## यज्ञोपवीतं कृत्वेत्यस्यमुख्ययज्ञोपवीतपरत्वं यज्ञोपवीतपदस्य वस्त्रे रूढिनिराकरणम् च

यदपि—**'यज्ञोपवीतं कृत्वाऽधोनिपपात नमो नम''** इति श्रुत्युन्नीतान्ययज्ञोपवीतं कृत्वाऽधोनिपतेदिति विधेश्च अत्र यज्ञोपवीतपदमजिनवासोविन्यासविशेषपरमेव न तु स्मार्तब्रह्मसूत्रपरं **'यज्ञोपवीत्यधोत 'इत्यत्रा' जिनं वासो वा दक्षिणत उपवीय दक्षिणं बाहुमुद्धरतेऽवधत्ते सव्यमिति यज्ञोपवीतं** मिति वाक्यशेषेण तत्र तस्य रूढेः कल्पतत्वात् यथा त्रिवृद्बहिष्पवमानमित्यत्र वाक्यशेषेण स्तोत्रीयानवके त्रिवृच्छब्दस्य रूढेः कल्पत्वेन **'त्रिवृदग्निष्टुदग्निष्टोमः'** इत्यादौ वाक्यशेषरहितेऽपि स्तोत्रीयानवकपरत्वमेव न तु

१. वै वर्णा १३२ पृ०

लौकिकत्रैगुण्यपरत्वमिति[1] त्रिवृदधिकरणन्यायस्य प्रकृतेऽपि तुल्यत्वादित्यादिना प्रणामे गौणोपवीतवर्णनम् ।

तदपि स्वाभीष्टसमर्थनाग्रहविजृम्भितम् । तस्यापि मुख्ययज्ञोपवीतपरत्वात् यज्ञोपवीत्यधीत इति श्रुतेः मुख्य यज्ञोपवीतपरतया देशिक चरणैस्सार्वभौमादिभिश्च प्रदर्शिततायाः आवेदितत्वात् ।

तन्त्रवार्तिके[2] शिष्टाकोपाधिकरणभाष्योक्तस्य यज्ञोपवीतिना कर्तव्यमिति स्मृतेर्विषयत्वस्याक्षेपे **'नन्विह न यज्ञोपवीतमुदाहर्तव्यं दर्शपूर्णमासादिषु उपव्यथते देवलक्ष्ममेवतत्कुरुत इति क्रत्वङ्गप्रत्यक्षविधानात्' तथा काठके चानारभ्यवाद विधिना सर्वयज्ञगत यजनयाजनसम्बन्धोऽध्ययनाध्यापनसम्बन्धश्च श्रूयते ।** प्रसृतेन वैयज्ञेन देवास्स्वर्गं लोकमायन्न प्रसृतेनासुरान् पराभावयन् प्रसृतौह वै यज्ञोपवीतिनो यज्ञोऽप्रसृतोऽनुपवीतिनो यत्किंचन्नाह्मणो यज्ञोपवीत्यधीते यजत एव तत्तस्मा द्यज्ञोपवीत्येवाधीयीत याजये द्यजेत वा यज्ञस्य प्रसृत्या इति रीत्या स्पष्टमभिधानात् ।

[3]"इदं प्रत्यक्षश्रुतिवाक्यं यज्ञोपवीतस्य विधायकं यद्यप्यजिनं वासो वेत्यग्रिमवाक्यपर्यालोचनया यज्ञोपवीत्येवाधीयीतेत्यत्र यज्ञोपवीतशब्दस्याजिनवासोविन्यासविशेषमात्रपरत्वमेव प्रतीयते न तु त्रिवृत्सूत्रनवतन्तुकत्रिग्रन्थियुक्तयज्ञोपवीतपरत्वम्, तथापि अजिनवाससोर्ग्रहणं न यज्ञोपवीतशब्दार्थान्तर्गतं, किंतु दक्षिणत उपवीय दक्षिणं बाहुमुद्धरतेऽवधत्ते सव्यमिति यज्ञोपवीतमित्येतावन्मात्रस्यैव यज्ञोपवीतसंज्ञाकरणात् तन्मात्रमेव शब्दार्थः । अत एव भट्टभास्करेण **'अजिनं वासोवेति द्रव्यविधि'** रित्युक्त्वा यज्ञोपवीतस्य लक्षणमाह इत्येवं दक्षिणत उपवीयेत्यादिव्याचक्षाणेन तावन्मात्रमेव यज्ञोपवीतरूपमुक्तम् । एवं च सामान्येन लक्षणकथनावतारात् अजिनवाससोर्ग्रहणस्य प्रदर्शनार्थत्वमाश्रित्य नवतन्तुकादिसाधारण्येनैव यज्ञोपवीत्येवाधीयीतेति श्रुतिः प्रवर्तत इत्याचार्याणामाशयः ।

अत एव भाष्यार्थसंग्रहकारेण—

**नवतन्तुदक्षिणं कृत्वा सव्यांसे यन्निधीयते**
**तत्सूत्राद्युपवीतं स्या द्दैवे कर्मणि तत्स्मृतम् ।**

इत्युक्तं" इति दर्शितश्रुतेर्बहुतरयुक्तिप्रदर्शनपुरस्सरं नयमयूरवमालिकायां प्रतिपादितत्वात्तत्पूर्वापरग्रन्थपर्यालोचनया अत्रैव ग्रन्थकृन्नैर्भर्यस्याप्यवधारणाच्च । परंतु यज्ञो-

१. पू० मी० १-३-४ ।
२. पू० मी० १-३-५ ।
३. नयमयूरवमालिका पू० मी० १-३-४.

पवीतपदस्य श्रुतिस्मृत्यादिभिर्विन्यासविशेषावच्छिन्नद्रव्यवाचिनस्तादृशसर्वद्रव्यबोधकता-संभवेऽपि ब्रह्मसूत्रे प्राचुर्यात् नववैत्रिवृत्कार्पासमुपवीतं स्यादित्यादिश्रुतिस्मृतिभिश्शिष्टा-चाराच्च सूत्रपक्षस्यैवाश्रितत्वाच्च पार्थदाशरथ्यादिशब्दवत्सूत्रासाधारण्यम् अयमर्थः प्रागेव प्रपञ्चितः। एतदभिप्रायेणैव—

**उपवीत्तं ब्रह्मसूत्रं सूत्रं यज्ञोपवीतकम्**
**यज्ञसूत्रं देवलक्ष्म इत्यारव्याष्षट् क्रमेर्ण तु।**

इति भरद्वाजादिभिः उपवीतादिपदस्य यज्ञसूत्रपर्यायता स्मर्यते। अत एव प्रसिद्धार्थ बोधकत्वस्य स्वारसिकतया यज्ञोपवीत्येवेति श्रुत्या यज्ञसूत्रबोधोऽवश्यं भावीत्यभिप्रेत्य तस्माद्यज्ञोपवीत्येवा धीयीतेत्यादे र्दुर्लङ्घत्वादिति श्रीशतदूषण्यामनुगृहीतम्। ततश्च यज्ञोपवीतं कृत्वेत्यस्य सम्यक् कृत्वेत्यर्थः। कृतस्य करणोक्तेरशिथिलीकरणरूप सम्यक्करणाभिप्रायकत्वात्। प्रणामसमये यज्ञसूत्रस्य ग्रीवाव्यवहितांसशिखरादाव-वस्थाने प्रणामकाले तद्भ्रंशप्रसङ्ग इति ग्रीवासन्निहितदेशावस्थापनेन यज्ञसूत्रं सम्य-क्कृत्वा प्रणनामेत्यर्थः पर्यवसितः। केवलावस्थानादिसमये ग्रीवाव्यवधानेन स्थितस्यापि प्रणामादिसमये तत्सन्निधापनस्य लोके प्रणामादिसन्नद्धेषु दृश्यमानत्वात् "सन्नद्धो भूत्वेति" भट्टभास्करीयविवरणमपि सुसङ्गतमेव।

यदि च यज्ञोपवीतं कृत्वेत्यत्र कृत्वेत्यस्य क्लेशः प्रसज्यत इति मन्यते तदा मुख्ययज्ञोपवीतं कृत्वेत्येवार्थः। तत्र च विशेष्यभूतसूत्राद्युद्देशेन विन्यासविशेषो विधीयते। विधिश्च प्राचीनावीतनिवीतादिविन्यासविशेषान्तरनिषेधार्थः। ईदृशयज्ञोपवीतकरण-मेव च प्रणामसन्नाहद्योतकमिति सन्नद्धो भूत्वेति भाष्याशयः। पूर्वमेव स्थितस्य यज्ञोपवीतस्य तत्काल उत्कीर्तन मावश्यकताद्योतनार्थमिति त्वस्माभिरप्यङ्गीक्रियत एवेति ज्ञेयम्। पूर्वोक्तरीत्या वस्त्रस्यापि यज्ञोपवीतधर्मित्वात् स्वकीयेन वस्त्रेण यज्ञो-पवीतं कृत्वेत्यस्यापि नानुपपत्तिः। त्रिवृदधिकरणन्यायग्रहणस्य च नोपयोगः। यत्र लोक-वाक्यशेषयोरर्थविप्रत्तिपत्ति स्तद्विषयत्वेनात्र लोकवेदयोर्विवादाभावात्।

## श्रीविष्णुतत्वस्य प्रतिनियतविषयत्वं, अनेकप्रमाणानुगुण्येन द्वितीय-वस्त्रमात्रपरत्वंवा पाद्मशंखादिवचनानामविरोधप्रतिपादनं च

यदपि श्रीविष्णुतत्वे—

**कांस्यघण्टाध्वनिं कृत्वा द्वारमाच्छाद्य वाससा।**
**कृत्वोपवीतवद्वस्त्र मुत्तरं प्राङ्मुखश्शुचिः॥**

इत्यारभ्य ताम्बूलान्तानुपचारानुक्त्वा

**ततः प्रदक्षिणं कृत्वा स्तोत्रमेतदुदाहरेत् ।**
**जितं ते पुण्डरीकाक्ष नमस्ते विश्वभावन**
**स्तोत्रमुक्त्वा प्रणम्यैनं दिशां कृत्वा प्रदक्षिणम् ।**

इत्युक्त्या अर्घ्याद्युपचारेष्विव प्रदक्षिणप्रणामस्तोत्रेष्वपि उपवीतवद्वस्त्रं धार्यमिति लभ्यत इति ।

तदपि चिन्त्यम् । तद्वचनस्य प्रामाणिकत्वे तत्संहितानिष्ठपूजकस्य तथालाभेऽपि अन्येषां तदलाभात् । सर्वेष्वपि प्रमाणेषु द्वितीयवस्त्रमात्रावश्यकतासिद्धे रीषत्क्लेशेनापि तत्परत्वसंभवाच्च । यदपि पाद्मे क्रियापादे—**"उपोषितश्शुचिस्नातो नववस्त्रोत्तरीयकं"** इत्यारभ्य विष्वक्सेनसंहितायां—**'उत्तरीयोष्णीषसंयुक्त आचार्यो बलिमाहरेत्'** इतीत्यन्तेन उत्तरीयादिपदघटितेन गौणोपवीतवर्णनम् ।

यच्च प्रथमतः विखनसस्त्रे उपनयनप्रकरणे 'या अकृन्तन्निति वस्त्रं, इयं दुरुक्तादिति मेखलां परीदमित्युत्तरीय' मित्यादिना ब्रह्मचारिणो गौणोपवीतवर्णनम्, तदुत्तरोत्तरीयशब्दानामुपरिभागवस्त्रपरत्वात्सुदूरनिरस्तम् ।

यदपि शङ्खः—**उपवीतं कटौ कृत्वा यःकुर्याद्गन्धलेपनम् ।**
**एकवासाश्च योऽश्नीयान्निराशाः पितरो गताः ॥**

उपवीतशब्दोऽत्र विन्यासविशेषावच्छिन्नवासःपरः कटिधारणस्य वाससेव संभवात् ।

**उद्धृतं दक्षिणं कृत्वा सव्यांसे यन्निधीयते ।**
**तत्सूत्राद्युपवीतं स्यात् देवे कर्मणि तत्स्मृतम् ॥**

इति भाष्यार्थसङ्ग्रहवचने आदिपदेन विन्यासविशेषविशिष्टवाससोप्युपवीतशब्दवाच्यत्वमात्राच्चेति ।

तदपि तुच्छम्—उपवीतशब्दार्थस्य मुख्यस्य त्यागे प्रमाणाभावात् । न ह्यन्तरिक्षे चयनादिवत् अस्य मुख्योपवीतस्य सूत्रस्य कटिधारणमसंभावितम् । विदुषोऽसंभावितत्वं च स्वोत्प्रेक्षितेऽपि समानम् । तस्मा द्यज्ञसूत्रं विना भोजनादिवत् मोहादिना संभावितकटिधारणपरमेव ।

किञ्च स्मृतिमुक्ताफले श्राद्धकाण्डे निमन्त्रितपूजाप्रकरणे

शातातपः— **पवित्रं तु करे कृत्वा यस्समालभते द्विजान्**
**राक्षसानां भवेच्छाद्धं निराशाः पितरोगताः ।**

इति समालम्भनं गन्धैर्विलेपनम् ।

देवलः— यज्ञोपवीतं विप्राणां स्कन्धान्नैवावतारयेत् ।
गन्धादिपूजासिद्ध्यर्थं दैवे प्रित्र्ये च कर्मणि ।

इत्युक्त्वा शङ्खः- उपवीतं कटौ कृत्वा यः कुर्याद्गन्धलेपनम् ।
एकवासाश्च योऽश्नीयान्निराशाः पितरो गताः ।

इति वचनमुदाहृतम् । तत्र स्वरसतोऽन्येनान्यस्य गन्धानुलेपने मुख्ययज्ञोपवीतस्य तत्प्रतिबन्धकताया अतिस्फुटतया तत्सिद्ध्यर्थं स्कन्धादुद्धरणं न कार्यमित्येवमर्थप्रतीत्या तस्यैवोपपादकत्वेनोपात्तशङ्खवचनस्यापि मुख्योपवीतपरत्वं स्पष्टमेव । उद्धृत्तं दक्षिणं कृत्वेति संग्रहवचनमपि मुख्ययज्ञोपवीतपरमेवेति प्रागेवोक्तम् ।

यत्तु चन्द्रिकायां वृद्धात्रिः

प्रौढपादो बहिः कक्षो बहिर्जानुकरोऽथवा
इद्धमन्नं नरश्श्राद्धे भुक्त्वा गच्छत्यधोगतिम् ।

बहिः कक्षः उत्तरीयवासोबहिर्भूतकक्षद्वितयः, उत्तरीयान्तर्गतकक्षद्वया भुञ्जीत वासो यज्ञोपवीतीत्युक्तम् भवतीति ।

तदपि न मनोरमम् । सर्वेष्वपि निबन्धनेषु बहिः कक्षः बहिर्भूतकक्षः उत्तरवासोबहिर्भूतकक्षः उत्तरवासोबहिर्भूतकक्षद्वितयः इत्येव व्याख्यातम्, तावता भवदभिमतपर्यवसानं न शक्यते वासो यज्ञोपवीतित्वे कथमन्तर्भूतकक्षत्व प्रत्युत उत्तरवासोबहिर्भूतकक्षत्वमेव **"यज्ञोपवीतं द्वैकक्ष्य"मिति** भरद्वाजवचनमुदाहृत्य द्वैकक्ष्यमन्तरीयं तस्यैव कक्षद्वयसंभवात्" इति वैदिकसार्वभौमैः कच्छपर्यायत्वेन कक्षपदस्य व्याख्यातत्वात् ।

## प्रौढपादो बहिः कक्ष इति वचनार्थनिर्वचनम्

निर्णयसिन्धौ 'प्रौढपादौ बहिःकच्छ" इत्येव वचनस्वरूपोपादानाच्च बहिः कक्ष इत्यनेन ।

परिधानात् बहिः कक्ष्या निबद्धा ह्यासुरी मता ।
धर्म्ये कर्मणि विद्वद्भिर्वर्जनीया प्रयत्नतः ।

इति वचनावगतासुरीकक्ष्या प्रतीयते तथा धारणे बहिःकक्षत्वसंभवात् अतस्तन्निषेध एव वृद्धात्रिवचनप्रतिपाद्य इति तु प्रतिभाति ।

यदपि वृद्धशातातपस्त्रिविधनान्दीश्राद्धं प्रकृत्य

**त्रिष्वप्येतेषु युग्मांस्तु ब्राह्मणान्नियतान् शुचीन् ।**
**प्रदक्षिणं तु सव्येन भोजयेद्देवपूर्वकम् ॥**

सव्येन-सव्यांसगतेनैव यज्ञसूत्रेणोत्तरवाससा चान्वितः श्राद्धकर्ताभोजयेदिति चन्द्रिकायां व्याख्यातम् । स्मृत्यर्थसारे-**वस्त्रं यज्ञोपवीतार्थे त्रिवृत्सूत्रं च कर्मसु** । इत्यनेन सर्वदैनिककर्मसु वस्त्रसूत्रोपवीतयोस्समुच्चयसिद्धिरिति च ।

## चन्द्रिकानिर्वाहः

तदपि चिन्त्यम् । स्मृत्यर्थसारवचनस्य मुख्ययज्ञोपवीतधर्मितया वैकल्पिक-सूत्रवस्त्रपरतायाः प्रागेवावेदितत्वात् सुधीविलोचने नान्दीश्राद्धप्रकरणे अत्रोपवीती प्राङ्मुखः प्रदक्षिणं सर्वं कुर्यात् इत्यभिधाय तत्प्रमाणतया अत्राभ्युदयिके युग्मा ब्राह्मणा आमूलादर्भाः प्राङ्मुखो यज्ञोपवीती स्यात् प्रदक्षिणमुपचार" इत्याश्वलायन-वचनोदाहरणात् विज्ञानेश्वरीये यथाहाश्वलायनः—अथाभ्युदयिक इत्याद्युदाहृत्य उत्तरश्लोकव्याख्यानावसरे अपसव्यवत्-प्राचीनावीत ब्रह्मसूत्रवत् अनेनानन्तरश्लोकोक्ताभ्युदयिके उपवीतित्वं सूचयतीत्यभिधानात्

**अपसव्यं न कुर्वीत न कुर्यादप्रदक्षिणम् ।**
**यथा चोपचरेद्देवान् तथा वृद्धौ पितॄनपि ।**
**प्रदद्यात्प्राङ्मुखः पिण्डान् वृद्धौ सव्येन वाग्यतः ।**

इति प्रचेतस्मरणैकार्थ्याच्च मुख्ययज्ञोपवीतस्यैव वृद्धिश्राद्धे पित्र्योपचारेष्वपि सव्यांसगतत्वम्

**प्रदक्षिणं तु सव्येन भोजयेद्देवपूर्वकम् ।**

इति वचनप्रतिपाद्यं **"सव्यांसगतेनैव यज्ञसूत्रेण उत्तरवाससा चान्वित"** इति चन्द्रिका-वाक्यस्योत्तरवासोमात्रतात्पर्यान्निविरोधः । तस्य प्रयोजनं बोधायनमतेऽपि वृद्धावुत्तरवस्त्रावश्यकत्वमेव ।

## दशाहतर्पणप्रकरणस्थस्मृतिरत्नवचनविवेचनम्

यच्च स्मृतिरत्ने दशाहतर्पणं प्रकृत्य

**अपसव्ये ततः कृत्वा वस्त्रयज्ञोपवीतके ।**
**दक्षिणाभिमुखै विप्रैर्देयं तोयाञ्जलित्रयम् ॥**

प्रचेताश्च—

उदकान्ते प्रसिञ्चेयुरपसव्ययज्ञोपवीतवाससो दक्षिणाभिमुखा ब्राह्मणा इति। अपसवे यज्ञोपवीतवाससी ब्रह्मसूत्रद्वितीयवस्त्रे येषां ते तथोक्ताः। एतदेव विपरीतं प्राचीनावीतमितिश्रुतेः प्राचीनावीतिना पित्र्याणि इति गृह्यसूत्राच्च वस्त्रप्राचीनावीतस्य बोधायनसूत्रे ब्रह्मसूत्रमधिकृत्य दक्षिणस्यांसस्येत्यादिना सूत्रप्राचीनावीतस्य च विहितत्वात्समुच्चयसिद्धिरिति वर्णनम्।

तदपि निमीलितनयनमार्जारक्षीरपानायते। एतदेव विपरीतं प्राचीनावीतं", "प्राचीनावीतिना पित्र्याणि दक्षिणस्यांसस्ये"त्यादि श्रुत्यापस्तम्बबोधायनसूत्राणां मुख्ययज्ञोपवीतस्य पित्र्ये विन्यासभेदतात्पर्यकत्वस्याभिहितप्रायत्वात् अपसव्ये ततः कृत्वा अपसव्ययज्ञोपवीतवासस इति स्मृतिरत्नप्रचेतस्स्मरणगतवस्त्रवासःपदयोः वस्त्रं निष्पीडनवस्त्रमिति व्याचक्षते वासोऽत्रनिष्पीडनवस्त्रमिति स्मृतिमुक्ताफलसुधी विलोचनयोर्व्याख्यातत्वात्।

"केशान्प्रकीर्येत्यादि एकवाससो दक्षिणाभिमुखा" इति सूत्रे एकवासोग्रहणात् उत्तरीयनिषेध इत्यभिधाय तत्प्रमाणत्वेन सुधीविलोचने उदाहृताद्वपनं कृत्वा स्नात्वा एकवस्त्राः प्राचीनावीतिना दक्षिणाभिमुखा अवटे सदर्भेजलाञ्जलिं दद्युरिति प्रचेत स्स्मरणाच्च द्वितीयवस्त्रस्यैव निषेधप्रतीतेश्च केशान्प्रकीर्य पांसूनोप्य एकवाससो दक्षिणाभिमुखा स्सकृदुपमज्जय, उत्तीर्य, उपविशन्ति, एवंत्रिः तत्प्रत्ययमुदकमुत्सिच्या-प्रतीक्षाग्राममेत्य यत्स्त्रिय आहुस्तत्कुर्वन्तीति आपस्तम्बसूत्रस्य जलांजलिदाने प्रमाणतया सुधीविलोचनमुक्ताफलादावुदाहरणात् प्रचेतस्मृत्यैकार्थ्याच्च एकवासस इत्येतत् उदकोत्सेचनादौ नान्वेतीत्यादिकल्पनमपि दुष्कल्पननेव।

## पितृमेधसाराविरोधोपपादनम्

यदपि पितृमेधसारे "आसमाप्तेः प्राचीनावीतं अन्यत्र प्राणायामाघारहोमाज्य-भागाग्निमुखस्विष्टकृद्धोमप्रायश्चित्ताहुत्यभिश्रवणाचमनप्रदक्षिणनमस्कारानुव्रजनेभ्य इति भाष्यार्थसङ्ग्रहे आघारदार्वग्नीत्यादिना उपवीतप्राचीनावीतसाधनं तत्र सिद्धमेवेति न साधनमर्हति।

## नयमयूखमालिकादीपिकाकौस्तुभाद्यानुगुण्यम्

यत्तु **नयमयूखमालिकायामुपवीताधिकरणे "वस्त्रं यज्ञोपवीतार्थे सूत्रं वा त्रिगुणीकृतम्"** इत्यत्र कर्मार्थतावेदकप्रमाणाभावात् कर्ममध्ये यज्ञोपवीतभ्रंषे कर्मार्थ-

स्वाभावेन कर्मणो न वैगुण्यं दर्शपूर्णमासप्रकरणे विहितस्य कर्मार्थत्वेन तद्भ्रंशे कर्मवैगुण्यं तत्र श्रौतं प्रायश्चित्तं कर्तव्यमिति उक्तम्, तन्न्यायेन **यज्ञोपवीत्येवाधीयीतेति** श्रुत्याऽध्ययनादिषु ब्रह्मयज्ञे च विहितत्वात् तद्भ्रंशे श्रौतप्रायश्चित्तं कर्तव्यं निषेकादिषु तु स्मार्तप्रायश्चित्तमिति ।

तदपि दृष्टान्त-दार्ष्टान्तिकयो र्मुख्ययज्ञोपवीतपरतया इष्टमेव । अयमर्थः यदित्वेन पुरुषार्थतया प्राप्तिराशङ्क्येत ततो यज्ञोपवीतिना कर्तव्यमिति स्मृत्यन्तरात् क्रत्वर्थत्वेनापि प्राप्तिरुद्भावनीया यदि तूक्तवचनेनाङ्गत्वे तद्भ्रंशे स्मार्तप्रायश्चित्तापत्ते र्यजुर्भोपप्रायश्चित्तप्राप्त्यर्थं दर्शपूर्णमासयो स्तद्विधानमाशंक्येत तदा **यज्ञोपवीत्येवाधीयीत याजयेद्यजेतवेत्यादितैत्तिरीयकश्रुत्या सर्वयज्ञार्थत्वेन यज्ञोपवीतविधानात् तत्प्रायश्चित्तस्यापि प्राप्त्युपपत्तेः विधानानर्थक्यमित्यादिभाट्टदीपिकावाक्यात्**, यद्यपि च त्रिसूत्रनवतन्तुक यज्ञोपवीतस्य तस्माद्यज्ञोपवीत्येवाधीयीत याजयेद्यजेतवेत्यानारभ्याधीत काठक वचनेन सर्वकर्मार्थत्वेनैव विधानात् न तद्विषयोऽयं विधिस्सं भवतीति कौस्तुभवाक्यादप्यवगम्यते ।

## भोजनकाले मुख्य यज्ञोपवीतस्यैव देवलादिवचनेषु विधानप्रतिपादक-हेमाद्रि-देशिकचरणाद्यभिप्रायनिरूपणम्

यच्चोक्तं भोजनेतु देवलः

**विना यज्ञोपवीतेन शिखया च विना द्विजः ।**
**भुनक्ति यदि मोहेन संभवेत्पापकृत्द्विजः ॥**
**उपोष्य रजनीमेकां पञ्चगव्येन शुध्यति ।** इति

**यज्ञोपवीतमिह वासोविन्यासविशेष** इति कल्पलतायामुक्तम् । अत्र ब्राह्मसूत्रभ्रंशे तु प्रायश्चित्तान्तरमाह **प्रजापतिः**—

**ब्रह्मसूत्रं बिना भुङ्क्ते विण्मूत्रं कुरुतेऽपि वा ।**
**गायत्र्यष्टसहस्रेण प्राणायामैर्विशुद्ध्यति ।** इति

तदपि चिन्त्यम् । अथोपवीतशिखे विना भोजने प्रायश्चित्तमाह

**देवलः**— **विना यज्ञोपवीतेन शिखया च विना द्विजः ।**
**उच्छिष्टो यदि मोहात्मा पापकारी भवेत् द्विजः ।**
**भुनक्ति यदि मोहेन संभवेत्पापकृत् द्विजः**

---

१. शास्त्रदीपिका व्याख्यायां पू० मी० ३-४-३ ।
२. भाट्टदीपिकायां ,, ,, ,, ,, ।

**मार्कण्डेयः—** **शिखया ब्रह्मसूत्रेण विना वर्तेत यो द्विजः ।**
**उपोष्य रजनीमेकां पञ्चगव्येन शुद्धयति ।**

इत्यादिना हेमाद्र्यादौ मुख्ययज्ञोपवीतं विना भोजने प्रायश्चित्तपरतयैवोपदर्शितदेवल-वचनोपन्यासात् मुख्यार्थत्यागे प्रमाणाभावाच्च । प्रायश्चित्तान्तराम्नानं तु कर्तृभेदा-दुपपद्यते । लघुगुरुरूपाणां च प्रायश्चित्तान्तरवत् शक्ताशक्तभेदेन आवृत्त्यनावृत्तिभ्यां वोपपत्तेः ।

एतस्यान्यथानयने—

**बिना यज्ञोपवीतेन यत्कृतं भोजनादिकम् ।**
**तत्पापप्रशमायालं प्रायश्चित्तं ब्रवीमि वः ।**
**तेषां तु भोजनादीनां प्रत्येकं सुसमाहितः ।**
**सहस्रार्धैरसुयसैर्विधिपूर्वकृतैश्शुचिः ।**

इति मुख्ययज्ञोपवीतपरतया देशिकचरणापात्तहारीतस्मृतिवचनस्याप्यन्यथानयना-पत्तिश्च ।

## पाद्मसंहितायास्समुच्चयपरत्वनिराकरणम्

**यदपि पाद्मे प्रायश्चित्ताध्याये भगवान्-**
**अस्नातोऽनुपवीतो वाप्य कृत्वा तिलकं तथा**
**अर्चयेद्देवदेवेशं प्रायश्चित्तीयते नरः ।**
**समाधानं मूलमन्त्रं शतं जप्त्वा तदर्चनम् । इति**

पुनः कुर्यादिति शेषः । अत्रोपवीतपदे वस्त्रं सूत्रं चाभिप्रेतम् ।

**स्वाध्यायाचामपूजासु वस्त्रं यज्ञोपवीतवत् ।**
**धार्यं विप्रेण विधिवदन्यथा कर्म निष्फलम् ॥**

इत्यादिभिरुत्तरीयावश्यकतासिद्धे रुत्तरीयपरत्वं दुरपह्नवम् । भुक्त्याचमनयो स्सूत्र-वस्त्रयोरभावे प्रायश्चित्तपुनः करणयोर्दृष्टत्वात् 'वस्त्रं यज्ञोपवीतार्थे त्रिवृत्सूत्रं च कर्मसु' इत्यनेनेज्यायामपि तयोस्समुच्चयस्य प्राप्तत्वादिति ।

तदपि न "अस्नातोऽनुपवीतश्चेत्यत्र मुख्ययज्ञोपवीतमेवा भिप्रेतं अन्यथा लक्ष-णानुपपत्तेः । स्वाध्यायाचामपूजास्विति वचनस्य मुख्योपवीतपरतया वस्त्रावश्यकता-परतया वा प्राक्व्याख्यातत्वात् तदङ्गत्वासिद्धेश्च । उपवीतं विना भुङ्क्त इत्याद्यु-पदर्शितवचनस्य मुख्ययज्ञोपवीतपरत्वात् ।

विना यज्ञोपवीतेन विना धौतेन वाससा।
मुक्त्वा शिखां वाप्याचान्तः कृतस्यैव पुनः क्रियां।

इति देवलवचनस्य धौतमुत्तरीयमिति व्याख्यातधौतपदघटितस्य द्वितं यवस्त्रमात्रपरत्वाच्च वस्त्रं यज्ञोपवीतार्थं इति वचनस्य मुख्ययज्ञोपवीतधर्मिपरताया असकृदावेदितत्वाच्च। अस्यां संहितायां समाराधनाध्याये "शुक्लोपवीतोत्तरीयश्चन्दनाद्यनुलेपनः" इत्याराधकस्योभयोरपि विहितत्वाच्च ताभ्यां विनाऽऽराधने प्रायश्चित्तं संभवत्येवेति कथनमपि न सत्। उत्तरीयशब्दस्य मुख्यार्थत्यागे प्रमाणाभावात् गौणार्थस्वीकारे मानाभावाच्च।

## जातुकर्णिदेवलहारीतादिवचनार्थनिर्वचनम्

यदपि जातुकर्णिः—उत्तरीयाभावे द्व्यङ्गुलं त्र्यङ्गुलं चतुरङ्गुलं वा सूत्रैः कृतैः परिमण्डलितं वस्त्रमुत्तरीयार्थे धारयेदिति।

आपस्तम्बधर्मसूत्रे "नित्यमुत्तरं वासः कार्यं मपि वा सूत्रमेवोप वीतार्थं" इति

यज्ञोपवीतं कुरुते सूत्रं वस्त्रं कुशं च वा।
कार्पासक्षौमगोवालशणवल्कतृणोद्भवम्।
सदा संभवता धार्यमुपवीतं द्विजातिभिः
मुक्तामयोपवीतं वा चामीकरमथापिवा।
धार्यं तद्वत्सुवर्णानां महादानादिकर्मसु।

इति गोभिलादिवचनविहितकुशरज्ज्वादिव्यावृत्त्यर्थं एवकार इति। तदपि न समीचीनम्—अपिवेत्यादिसूत्रस्य मुख्ययज्ञोपवीतपरतायाः प्रागुपदर्शितत्वात् जातुकर्णिवचनस्य द्वितीयवस्त्राभावे तदर्थविधिपरत्वात् यज्ञोपवीतं कुरुत इत्यादेर्मुख्ययज्ञोपवीतपरतायाः प्रागेव प्रदर्शितत्वात् कार्पासक्षौमगोवालेत्यादिगोभिलवचनानां मुख्ययज्ञोपवीतार्थताया मुक्ताफलादिग्रन्थसन्दर्भावधृतत्वाच्च अपि वा सूत्रमेवेति सूत्रस्थैवकारस्य वासोव्यवच्छेदकतायाउज्ज्वलोक्तेश्च।

## गृहस्थानामुपवीतद्वयमेव नित्य, मिति वर्णनम्

यदपि—

एकोपवीतं धार्यं स्याद्यतीनां ब्रह्मचारिणाम्
गृहस्थानां वनस्थानां मुपवीतत्रयं विदुः॥

इति हारीतेन गृहस्थवनस्थयोराश्रमाङ्गतया विहिते ब्रह्मसूत्र त्रये तृतीयस्योत्तरीयार्थत्वमप्यनेन विधीयते । तथा च देवलः—

**ब्रह्मचारिण एकं स्यात् स्नातस्य द्वे बहूनि वा ।**
**तृतीयमुत्तरीयार्थे वस्त्राभावे तदिष्यते ।** इति

बहूनीत्यस्य त्रीणीत्यर्थः । तृतीयमित्यनुरोधात् स्वरसतो हारीतमतप्रदर्शनपरत्वप्रतीतेश्च ।

यज्ञोपवीतप्रतिष्ठाविधौ बहुपदप्रयोगस्वारस्यात् देशिकचरणानां हारीतपक्ष एवाभिमत इत्यवसीयते । द्वे इति पक्षेतु तृतीयसूत्रस्योत्तरीयार्थत्वमेव नाश्रमाङ्गत्वमपि ।

अमुं पक्षं भृगुराह—

**उपवीतं वटोरेकं द्वे तथेतरयोस्स्मृते ।**
**एकमेव यतीनां स्यादिति शास्त्रस्य निश्चयः ।** इति

उत्तरीयार्थम् इत्येतावतैव तत्कार्यकरत्वे सिद्धे वस्त्राभाव इत्याधिकोक्त्या उत्तरीय सद्भावे तत्कार्यकरत्वं तृतीयसूत्रस्य नास्तीति लभ्यते ।

**एकमेव यते स्सूत्रं साजिनं ब्रह्मचारिणः ।**
**सोत्तरीयाणि गृहिण स्तथैव वनवासिनः ॥**

इति व्यासवचने त्रयाणामुपवीतानां सोत्तरीयत्वोक्त्यापि वस्त्राभावे तत्प्रतिनिधित्वं सूत्रस्य नेति लभ्यते द्वे इति पक्षे उत्तरीयस्य सत्त्वे तदर्थसूत्रस्य नैरर्थक्यात् कण्ठादुद्धरणं तु न शक्यम् ।

**मन्त्रपूतं स्थितं काये यस्य यज्ञोपवीतकम् ।**
**नोद्धरेत्तु ततः प्राज्ञः यदीच्छेच्छ्रेय आत्मनः ॥**
**कायस्थमेव तत्कार्यं मुत्थाप्यं न कदाचन ।**
**सकृदुद्धरणाद्विप्रः प्रायश्चित्तीयते द्विजः ॥**

इति भृगूक्तहेतो र्मन्त्रपूतत्वात्मकस्य तृतीयसूत्रेप्यविशिष्टत्वात् ।

## पूर्वोक्तविषये नयमयूखमालिकाटुप्टीकादिनिर्वाहः (६-३-५)

अपि च "नयमयूखमालिकायां षष्ठाध्याये आहवनीयादे र्देशरूपत्वेने दृष्टार्थत्वे पदेनाहवनीयबाधो न स्यात् किन्तु भिन्नादृष्टार्थत्वेनोभयो विरोधाभावात् समुच्चय एव स्यादित्युक्तम्

जैमिनीन्यायमालाविस्तरे **व्रीहियवयोर्दृष्टार्थत्वेन विरोधात् विकल्पः सोमभक्षणं तु अदृष्टार्थत्वेन विरोधाभावात्समुच्चय इति** प्रतिपादितम् ।

**टुप्टीकायां च यज्ञोपबीतेनोपवीतस्याविरोधात् समुच्चय** इति स्पष्टमेवोक्तम् । **यज्ञोपवीतं सूत्रविन्यासविशेषः, उपवीतं वासोविन्यासविशेष इति सोमनाथः** । अयं ग्रन्थो वस्त्रतत्प्रतिनिधिसूत्रसमुच्चयपरएव । यज्ञोपवीतेनोपवीतस्य दृष्टार्थत्वेन विरोधाद्विकल्प इति शङ्कानिरासार्थं प्रवृत्तत्वात् । अन्यथा शिखायज्ञोपवीतादेरिव विरोधप्रसक्तेरेवाभावेन तत्समाधानोक्तेरनपेक्षितोत्तरत्वप्रसङ्गात् ।

यथा—

**शुल्कैस्तु तर्पयेद्देवान्मनुष्यान् शबलैस्तिलै ।**
**पितॄंस्तु तर्पयेत्कृष्णै स्त्रिभिस्सप्तभिरेव वा ॥**
**तिलानामप्यभावे तु सुवर्णं रजतान्वितम् ।**
**तदभावे निषिञ्चेत्तु दर्भैर्मन्त्रेण वा पुनः ॥**

इति वचनावगतमुख्यगौणभावानां तिलादीनां संभवे समुच्चयः असंभवे विकल्पः ।

**उपात्ते तु प्रतिनिधौ मुख्यार्थो यदि लभ्यते ।**
**तदामुख्यमनादृत्य गौणेनैव समापयेत् ॥**

इति षाष्ठन्यायसिद्धवचनस्याऽवृत्तिः । तस्य दृष्टार्थविषयकत्वात्, तद्वदत्रापीति सुधीभिरवधेयमिति ।

तदप्यसत्—**एकोपवीतं धार्यं स्यादिति हारीतवचनं** न गृहस्थवनस्थयोराश्रमाङ्गतयोपवीतत्रयविधायकम् । **ब्रह्मचारिण एकं स्यादिति देवलवचनं** तु तयोराश्रमाङ्गतया उपवीतद्वयविधाकं कामनायां त्र्यादिविधायकं च ।

**उपवीतं वटोरेकं द्वे तथेतरयोस्स्मृते ।**
**एकमेव यतीनां स्यादिति शास्त्रस्य निश्चयः ॥**

इति भृगुस्मृतेः ।

**यज्ञोपवीते द्वे धार्ये श्रौते स्मार्ते च कर्मणि ।**
**गृहस्थानां वनस्थाना मुपवीतद्वयं विदुः ।**
**एकैकं व्रतियत्योस्स्यात् द्वे सूत्रे गृहिणस्स्मृते ।**
**बहूनि चायुष्कामस्य त्र्यादिकाम्यं प्रचक्षते ।**

इत्यादिभरद्वाजपराशरदेवलवचनैरेवमवगम्यते । **माधवीये** उपवीतसंख्यामाह—**भृगुः** ।

**एकमेव यतेस्सूत्रं साजिनं ब्रह्मचारिणः ।**
**सोत्तरीयाणि गृहिणस्तथैव वनवासिनः ।**

इति । एतच्च नित्याभिप्रायम् । कामनायां बहूनां धारणश्रवणात्—तथा च **देवलः 'बहूनि चायुष्कामस्येति'** इत्यभिधानाच्चायमर्थो ज्ञायते । अन्येष्वपि निबन्धन ग्रन्थेषु भृगुदेवलवचनान्येवोपात्तानि । **''तृतीयमुत्तरीयार्थं वस्त्राभावे तदिष्यते''** इति देवलभरद्वाजवचनखण्डौ तु द्वितीयवस्त्राभावे ब्रह्मसूत्रस्य उत्तरीयार्थताविधिपरौ । एकोपवीतं धार्यं स्यादिति हारीतवचनमपि गृहस्थवनस्थयोरुत्तरीयार्थसूत्रसाहित्येनोपवीतत्रयपरम् ।

यज्ञोपवीतप्रतिष्ठाविधौ बहुपदोपादानं नोपवीतत्रयस्याश्रमाङ्गताबोधकं सत् स्वाभिमतताद्योतकम् । प्रत्येकं मन्त्राचमनमात्रस्य यज्ञोपवीताधिक्ये विधिपरत्वात् । चेदित्यनेनानियतत्वद्योतकेनोत्तरीयार्थतया कामनया वा प्राप्तसूत्रसाहित्येन बहुत्वानुवादकत्वावसायाच्च, भृगुवचनाद्यवगतं शिष्टाचारसिद्धमुपवीतद्वयमेव गृहस्थ वनस्थयो नित्यमिति देशिकचरणाभिमतमित्यस्यापि सुवचत्वाच्च ।

कामनया त्र्यादिधारणे द्वितीयवस्त्राभावे तदर्थत्वेनाधिकमेकं सूत्रं धार्यमेव तुल्यन्यायात्, तृतीयपदंवावयुत्यानुवादोस्त्वित्यन्यदेतत् ।

**एकमेव यतेस्सूत्रं साजिनं ब्रह्मचारिणः ।**
**सोत्तरीयाणि गृहिणस्तथैव वनवासिनः ॥**

इति व्यास भरद्वाज वचनयो रुपवीत बहुत्ववर्णनं काम्याभिप्रायम् । उत्तरीयार्थ इत्येतावता तत्कार्यकरत्वसिद्धे वैकल्पिकत्वावश्यत्या उत्तरीयसत्वेऽपि तदर्थतया विकल्पेन सूत्रपरिग्रहस्य शास्त्रीयत्वशङ्कायां वस्त्राभावे तदिष्यत इत्यंशोऽभावे विधिविधया तस्याशास्त्रीयत्वख्यापकः, न केवलं वस्त्रप्रतियोगिकाभावमात्रं निमित्त द्वितीयवस्त्रसत्वेऽपि तद्धारणानुपपत्तेः । किन्तु सदाधरणशक्यद्वितीयवस्त्राभाव एव । लोकेह्यनुपहतशुष्कवस्त्रस्य कदाचिदलाभसंभावनया हि तृतीययज्ञोपवीतं शिष्टा दधते । येषां च तादृशसंभावना नास्ति तेषां न तृतीय यज्ञोपवीतम् । येषां च संभावना तेषां तादृशवस्त्राभावे विधीयमानं सूत्रं धार्यम् ।

किञ्चैकादृष्टार्थत्वेन विधानात् तादृशवस्त्राभावे विधीयमानस्य परिग्रहे तल्लाभेऽपि यावदप्रायत्य सूत्रमेव तत्कार्यकारि तस्य तत्कार्ये प्रवृत्तत्वात् मन्त्रानुस्य विना कारणमशक्योद्धरणत्वाच्च । तदा द्वितीयवस्त्रधारणं तु शीतत्राणादिदृष्टकार्यार्थतया लोकसंग्रहाय वेत्यन्यदेतत् ।

**टुप्टीकायां च** यज्ञोपवीतेनोपवीतस्य समुच्चयविधानं तु उभयोरदृष्टार्थत्वेन दृष्टार्थत्वशङ्काया अभावात् द्वितीयवस्त्रकार्यादृष्टकारित्वस्येव सूत्रे तृतीयमित्यादिवचन-सिद्धत्वाच्चैवमुपपादनीयम्।

**"यज्ञोपवीतं कुरुते सूत्रं वस्त्रं कुश च वा"** इत्यादिवचनबलात् सूत्रादीनां वैकल्पिकत्वावगत्या विशेषविधिविधेयेन वाससा सूत्रकार्यसिद्धिशङ्कायां **(उपवीतं) उपव्ययत** इति विधेर्दर्शपूर्णमासाङ्गतया अपूर्ववासोविन्यासभेदविधायकत्वात् सूत्रकार्ये नैतस्य प्रवृत्तिरिति विभिन्नादृष्टार्थत्वात्प्रयाजादिवत्समुच्चयपरमिति।

यथाशुक्लैस्त्वित्यादिना दृष्टान्तप्रदर्शनमप्यन्धस्य जात्यन्धेन यष्टिप्रदानमनुकरोति। न चात्रसमुच्चयः, नापि समविकल्प इत्यभिप्रेत्य

**मरीचिराह—**

**तिलानामप्यभावे तु सुवर्णं रजतान्वितम्।** इति
**तदभावे निषिञ्चेत्तु दर्भैर्मन्त्रेण वा पुनः।**

मरीचिवचनस्य माधवादिभिरवतारितत्वात् सोत्तरोयाणि गृहिण इत्युक्त्या उपवीत समानदेशत्ववचनं तु सोत्तरीयोर्ध्वपुण्डधृगित्यादिवचनादूर्ध्वपुण्ड्रादिसमानदेशत्वापत्त्या पराहतम्। ब्रह्मचारिणोऽजिनधारणमपि द्वितीयवस्त्रार्थे तत्रापि विन्यासविशेषो न क्वापि श्रूयते, प्रत्युत **'हारिणमैणेयं कृष्णं ब्राह्मणस्य'** इति सूत्रानन्तरमस्मिन् पक्षे विशेषमाहेत्यवतारितेन **'कृष्णं चेदनुपस्तीर्णा स न शायी स्यात्'** इति सूत्रेण कृष्णं चेद्बिभृयान्न हारिणं ततस्तस्मिन्नुपस्तीर्णे नासीत न च शयीतेत्यर्थकेन नियमस्यैवावगमात्।

## प्रकरणानुगुण्येन शिष्टाचाराच्च तर्पणे वन्दन इत्यादिनिषिद्धकाल भिन्नकालेऽनियमेनोर्ध्ववस्त्रधारणप्रतिपादनमुखेन ग्रन्थनिगमनम्

एवं च केनापि प्रमाणेन विरोधगन्धाभावात्

**तर्पणे वन्दने श्राद्धे कट्यामेव तु धारयेत्।**
**प्रदक्षिणे प्रमाणे च देवतागुरुसन्निधौ।**
**वस्त्रनिष्पीडने स्नान उपस्थानेऽभिवादने।**
**धार्यं कट्यामुत्तरीयं पितृकार्ये सुरालये।**

---

१. आ० ध० सू० १-२-३।
२. ,, ,, ,, १-२-४।

इत्यादि सुधानिध्यादिवचनानि कालविशेषे विन्यासविशेषनियमपराणि प्रमाणमूर्धन्यतामासादयन्ति ।

न च "तर्पणे वन्दने श्राद्ध" इति श्लोकपूर्वार्धं उपवीतं सदा धार्यं श्रौते स्मार्ते च कर्मणि इत्यत्रोत्तरवाक्यानुषङ्गानुरोधेन उत्तरीयपरोपवीतपदस्य श्रौते स्मार्ते च कर्मणि विन्यासविशेषविशिष्टवस्त्रविधायकत्वं शङ्क्यम् परिभाषाप्रकरणत्वात् ।

**यज्ञोपवीते द्वे धार्ये श्रौते स्मार्ते च कर्मणि ।** इति भरद्वाजवचनप्रत्यभिज्ञानाच्च श्रौतस्मार्तसर्वकर्मार्थत्वं मुख्योपवीतस्य पूर्वार्धं बोधयति ।

यद्युत्तरवाक्यानुरोधादस्योत्तरीयपरत्वं तदापि विन्यासाप्रतीत्या द्वितीयवस्त्रस्यैवावश्यकतां ब्रूयात् । पूर्ववाक्ये विन्यासविशिष्टबोधकत्वं उत्तरवाक्येऽनुपक्तस्य केवलवस्त्रबोधकत्वं च प्रकल्प्य प्रमाणलेशे नापि दुर्गतस्य विन्यासविशेषस्य साधनमुपेक्ष्य पूर्वार्धस्य पूर्वोक्तरीत्या उपक्रमाधिकरणनयेन मुख्यार्थपरत्वमुत्तरार्धस्य च योग्यताबलात् द्वितीयवस्त्रधारणनियमपरत्वमेवोत्तरीयपदाध्याहारेण स्थलान्तर इव वर्णयितुं युक्तम् । तस्मात्पूर्वपक्ष्युदाहृतानां सूत्रतद्व्याख्यातृवचनानां स्मृतिवचनानां तदुदाहृतश्रुतीनां च कात्स्न्र्येनान्यपरत्वात् उत्तरीयमूर्ध्वभागाच्छादकमवश्यमूर्ध्वभागे धार्यं यदा वचनबलान्नियमो लभ्यते तदा तथैव अन्यथात्वनियम इत्येव शास्त्रार्थः **पर्यवसितः**

**अत्र "मन्त्रं सदैवभुञ्जार्थं ब्रह्मसूत्रं गलेक्षिपेत् । कण्ठे तु सव्यं निक्षिप्तं"** इत्यादिवचनावगतब्रह्मसूत्रदेशे वस्त्रनिषेधकं—

**प्रदक्षिणे प्रणामे च पूजायां हवने तथा ।**
**न कण्ठगतवस्त्रस्स्यात् दर्शने गुरुदेवयोः ।**

इति शाण्डिल्यवचनम् ।

**उत्तरीयं कटौ बद्ध्वा याजुषस्स्नानमाचरेत् ।**
**वामप्रकोष्ठे निक्षिप्य बह्वृचस्स्नानमाचरेत् ।**
**उत्तरीयं कटौबद्ध्वा ऊर्ध्वपुण्ड्राणि धारयेत् ।**
**वन्दने तर्पणे श्राद्धे देवदेवस्य दर्शने ।**
**प्रदक्षिणे स्नानकाले कक्ष्यामेव तु धारयेत् ।**
**वस्त्रनिष्पीडने स्नान उपस्थानेऽभिवादने ।**
**अर्घ्यप्रदक्षिणे चैव पितृकार्ये तथैव च ।**

इत्यादिसंग्रहकारवसिष्ठसहिताकाश्यपमरीचिवचनान्यपि नियमपरमूलप्रमाणानि भाव्यानि । सन्तु चात्र प्रमाणवचनानि । अविगीतशिष्टाचार्यादिपरंपराप्राप्ताचार एव होलकाधिकरणन्यायात् तत्तत्काले द्वितीयवस्त्रस्य विन्यासविशेषं व्यवस्थापयति ।

अद्य यावत् शिष्टास्सर्वेऽपि तर्पणादौ देवादि सन्निधौ च नाभेरुपरि कट्यामेवोत्तरीयं, अन्यदा तु अनियमेन उत्सर्गादौ अंसादौस्थितमपि शिरसि च विभृतस्समीक्षन्ते ।

पूर्वपक्ष्युन्मेषात्प्राक् को वापि प्रणामादौ सव्यस्यांसस्येत्यादि सन्निवेशविशिष्टवस्त्रः दृष्टश्रुतो वा ।

इदानोन्ननस्तु तत्प्रतारणमूलको द्वित्र्याद्याचारः प्रमाणाभावाद्वचनविरोधात् संप्रतिपन्नशिष्टाचारविरोधाच्च दुराचार एवेत्यवधारयन्तु निर्मत्सरा विद्वांसः ।

नह्याचार प्रामाण्ये विवदितव्यम्—

**वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम् ॥**

इत्यादिवचनै र्मीमांसकै स्सप्रपञ्चं समर्थनात् ।

तिष्ठतु तावत्प्रमाणोपपत्तिपरामर्शः, भाष्यकारसंप्रदाय स्तावत् परिचिन्त्यतामित्यादिकथा, तर्हि **'सत्रिव्रतिब्रह्म चारिदातृब्रह्मविदां तथा'** इति सहपठितानां सत्रिप्रभृतीनामपि सत्रव्रतब्रह्मचर्यदानादिनिमित्तमघसंकोचन मिति तेषामप्येतदन्तिमयुगे न स्यादिति चेत्, अनुष्ठानतस्तद्व्यवस्थापनात् अद्यापि हि सद्यश्शौचं व्रत्यादिषु शिष्टैरनुष्ठीयते **न शारीराधिगमसिद्धब्रह्मवेदनवतामपि गृहस्थानां क्वचित्तदनुष्ठानं दृश्यत इत्यादिकथा च श्रीपाञ्चरात्ररक्षाश्रीसूक्त्या** । यद्यप्येते श्रुतिस्मृत्यादयो न दृश्येरन् तथापि नेदममुष्ठानं हेयं, **होक्ताकाधिकरणन्यायादित्यादि श्रीसच्चरित्ररक्षा** श्रीसूक्त्या च देशिकचरणैरपि प्रामाण्यस्य समर्थितत्वात् । तस्मान्निष्कण्टकोऽयं घण्टापथ इति दिक् ।

**काश्यपस्मृतौ**—

**संप्रोक्ष्य वस्त्रं मन्त्रेण मूलेन प्रणवेन वा ।**
**अस्त्रमन्त्रेणाभिमन्त्र्य गृहीत्वा मूलविद्यया ।**
**ब्रह्मसूत्रं निवीतंतु कृत्वा कर्णावलम्बितम् ।**
**उत्तरीयेण वस्त्रेण शिरस्संवेष्ट्य मौनवान् ।**
**प्राङ्मुख उदङ्मुखो वापि वस्त्रं संधारयेद्द्विजः ।**
**कटिसूत्रं च कौपीनमन्तरीयं क्रमेण तु ।**
**उत्तरीयं बहिर्वस्त्रं द्विराचामेत्ततो बुधः ।**
**सन्ध्यायामर्घ्यकाले च मार्जने जपकर्मणि ।**

**पूजायां होमकालेतु भोजनेऽतिथिपूजने। उपासने गुरूणां च स्वाध्याये ब्रह्मयज्ञके। यज्ञकाले विशेषेण शुद्धचाचमनकर्मणि। यज्ञोपवीतवद्धार्यमुत्तरीयं सदा बुधैः। वन्दने तर्पणेश्राद्धे देवदेवस्य दर्शने। प्रदक्षिणे स्नानकाले कट्यामेवतु धारयेत्। करे स्कन्धेऽथवाकण्ठे पादमूले विशेषतः। यदि धृत्वा चोत्तरीयं स्नानं कुर्यात्पतत्यधः। तस्माद्धृत्वा चोत्तरीयं कटिदेशे द्विजोत्तमः। स्नानं कृत्वा विधानेन कर्मण्यो भवतिध्रुवम्॥** इति। अथमर्थः—संप्रोक्ष्येत्यादिना वस्त्रधारणप्रकारं सप्रपञ्चमभिधाय सन्ध्यायामर्घ्यकाले चेत्यादिना यज्ञोपवीतवद्धार्यमुत्तरीयं सदा द्विजै रित्यन्तेन कर्मार्थतां पुरुषार्थतां चाभिधाय तद्धारणे कालविशेषे नियममाह—वन्दने तर्पणे श्राद्ध इत्यादिना। तथाहि—यज्ञोपवीतवदुत्तरीयं सदा धार्यं, सन्ध्यायामित्याद्युक्तकालेषु विशेषतो धार्यमिति योजना, सन्ध्यायामित्याद्युक्तकालेषु विशेषतो यज्ञोपवीतवदुत्तरीयं सदा धार्यमिति वा। तत्र द्वितीयपक्षे पुरुषार्थता प्रमाणान्तरगम्या। स्वरसत स्सदेत्युक्त्या च उत्तरवाक्ये कट्यामेवेत्यवधारणेन च यज्ञोपवीतवदवश्यधार्यत्वमेव प्रतीयते।

यज्ञोपवीतवदित्यनेनाविशेषेण विन्यासबोधकत्वस्यापि संभवेऽपि विशेषविधानस्य शेषनिषेधार्थत्वात् सदाधार्यमित्यनेनविशेषविधानेन तदसंभवात् वन्दनादौ तु नाभेरुपरि कट्यामेव धारणं, अन्यदा तु अनियमः। कट्यामेवेत्यत्र एवकारश्च विन्यासान्तरव्यवच्छेदार्थः। अत एव करे स्कन्धेऽथवापुनरित्यादिना स्नानकाले स्थानान्तरनिषेधकार्थवादोपपत्तिः।

एवकारस्य उपवीतविन्यासव्यवच्छेदकत्वे च **'यज्ञोपवीतवत्कृत्वा यदि स्नायात्पतत्यधः'** इत्यर्थवादेन भवितव्यम् किञ्च सन्ध्यायामित्याद्युक्तकालेषु प्रमाणान्तरेण यज्ञोपवीतविन्यासस्योत्तरीये स्पष्टत्वे तदनुरोधेन भवेदपि विन्यासविशेषेऽस्य तात्पर्यं तदेव न।

देवदेवदर्शने कट्यामेव धारणविधानेनापि पूजाकालादि साधारण्येन यज्ञोपवीतवद्धार्यमुत्तरीयं सदा द्विजै रित्यन्तेनावश्यधारणमेव विधीयत इत्यवगम्यते।

भवतु वा विन्यासविशेषविधानं, न तत्राग्रहः। वचनान्तराणां स्पष्टार्थकानां संकोचः, क्लिष्टार्थकल्पनं च परमतिरिच्येते। कालान्तरेऽनियमं वदतामस्माकं तथा धारणे शास्त्रार्थसम्पत्तेः। वचनान्तरनिषेधबलात् जीवपितृकै र्जीवज्येष्ठैर्वा यदा कदाचिदपि विन्यासविशेषविशिष्टोत्तरीयधारणे अन्यैश्च वन्दने तर्पण इत्याद्युक्तकालेषु तथा धारणे च प्रत्यवायो दुर्निरोध एवेत्येवं विमृशन्तु।

श्रीरस्तु

प्रतारणोक्तिसञ्जात (बालिश) पामरभ्रान्तिशान्तये ।
कृतेयं रचना हृद्या कृतिभिः परिगृह्यताम् ॥

श्रीमते लक्ष्मीहयवदन-परब्रह्मणे नमः

श्रीमते वेदान्तरामानुजमहादेशिकाय नमः

इति अय्या श्री नरसिंहनाताचार्यविरचितो यज्ञोपवीततत्त्वविमर्शस्समाप्तः ।

## सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य

### नूतनानि प्रकाशनानि

१. **ऋग्वेदप्रातिशाख्यम्**—ग्रन्थरत्नमिदं विविधैः पठान्तरैः संशोध्य उवटाचार्य-कृतभाष्यसहितं प्रकाशितम्— ५६-००

२. **संस्कारसारः**—श्रीदलपतिमहाराजप्रणीतोऽयं धर्मशास्त्रीयो ग्रन्थो विभिन्नैः परिशिष्टैः सम्भूष्य प्रकाशितः— ५०-००

३. **अद्वैतदीपिका**—श्रीनृसिंहाश्रमविरचितेयमद्वैतदीपिका श्रीनारायणाश्रमविर-चिताद्वैतदीपिकाविवरणाख्यटीकया सनाथीकृत्य प्रकाशिता—द्वयोर्भागयोः— १०३-००

४. **न्यायमञ्जरी**—श्रीमज्जयन्तभट्टप्रणीतेयं न्यायमञ्जरी श्रीचक्रधरविरचितया 'ग्रन्थिभङ्ग'व्याख्यया समलङ्कृत्य प्रकाशिता—त्रयाणां भागानाम्— १५२-००

५. **व्योमवती**—व्योमशिवाचार्यविरचितमिदं ग्रन्थरत्नं विविधैः पाठभेद-परिशि-ष्टादिभिः सह प्रकाशितम्—
प्रथमभागस्य— २७-००
द्वितीयभागस्य— ५०-००

६. **तत्त्वचिन्तामणौ प्रामाण्यवादः**—तत्त्वचिन्तामणिग्रन्थस्य प्रामाण्यवादपर्यन्तोऽयं ग्रन्थः श्रीगौरीनाथशास्त्रिविरचितया 'प्रभा'ख्यव्याख्यया युतः सन् प्रकाशितः— १५-००

७. **प्रगल्भी**—तत्त्वचिन्तामणिग्रन्थस्योपमानखण्डात्मकमिदं पुस्तकं श्रीप्रगल्भा-चार्यप्रणीतया 'प्रगल्भी' व्याख्यया समलङ्कृत्य प्रकाशितम्— १५-००

८. **अभावविमर्शः**—श्रीदीपकघोषप्रणीतमिदं ग्रन्थरत्नं नानाशास्त्रनिष्कर्षभूतं चकास्ति— १६-००

९. **दीधितिकारोपज्ञविचाराणामालोचनम्**—अनुसन्धानप्रबन्धोऽयं दीधितिकार-सिद्धान्तानां भृशं समाचोचनां विदधाति— ५०-००

१०. **नित्याषोडशिकार्णवः**—तन्त्रशास्त्रस्य प्राणभूतमिदं ग्रन्थरत्नं शिवानन्दकृतया 'ऋजुविमर्शिन्या', विद्यानन्दकृतया 'अर्थरत्नावल्या' च टीकया सनाथीकृत्य प्रकाशितम्— ७६-००

११. **परमानन्दतन्त्रम्**—तन्त्रशास्त्रीयोऽयं ग्रन्थो विविधैः पाठभेद-परिशिष्टादि-भिरानुसन्धानिकफलश्रुतिभिः सम्भूष्य प्रकाशितः— ९५-००

१२. **शिवमहिम्नस्तोत्रम्**—स्तोत्रमिदं **'मधुसूदनी', 'नारायणी'** प्रभृतिभिः संस्कृत-टीकाभिः, अथ च हिन्दीपद्यानुवाद-हिन्दीव्याख्यादिभिः सनाथीकृत्य प्रकाशितम्—२०-००

१३. **अग्निपुराणोक्तं काव्यालङ्कारशास्त्रम्**—अग्निपुराणस्य काव्यालङ्कारभाग-पर्यन्तमिदं ग्रन्थरत्नं **'काव्यप्रभावृत्ति'**संस्कृतटीकयाऽथ च हिन्दीव्याख्यया सम्भूष्य प्रकाशितम्— ५६-००

१४. **पाणिनीयधातुपाठसमीक्षा**—(द्वितीयं संस्करणम्) व्याकरणशास्त्रीयोऽयं ग्रन्थः स्वीयैर्गवेषणाभरिततत्त्वैः कामं बिभर्ति महनीयामभिख्याम् । प्रथमभागस्य— ८५-००

१५. **वाल्मीकिरचनामृत**—वाल्मीकिरामायणस्य विविधान् प्रसङ्गान् उपजीव्यत्त्वे-नाङ्गीकृत्य विदुषा पण्डितश्रीकुबेरनाथशुक्लेन मार्मिकं तात्त्विकञ्च विवेच-मनुष्ठितम्— ५६-००

---

प्राप्तिस्थानम् :—
**विक्रयविभागः**, सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य, वाराणसी-२२१००२.